स्वकीयम्

क. २३ व. ३२ पु. १६

॥ सर्वोत्तमजीकी टीका प्रारंभते ॥ पत्राणि ५०

॥श्रीहरिः॥ नत्वापितृपदांभोजमैहिकामुष्मिकार्थदं। तत्प्रोक्ताचार्यनामानि
विवरिष्ये यथामति॥१॥ यद्यप्ययोग्य एवाहं तन्नामविवृतौ स्वतः। स्वीय
त्वेनैव कृपया योग्यतामपि दास्यति॥२॥ इति विश्वासतो नूनं प्रवृत्तोहं
न चान्यथा। ऽअतस्तदेव शरणं मम सर्वार्थसिद्धये॥३॥ श्रीमत्पितृचरणाः
श्रीमदाचार्याणां ऽअलौकिकनामानि प्रकटयितुमाचार्याणां स्वरूपं तत्प्रा
कट्यहेतुं च वक्तुं ऽप्रार्थयैक प्रकटितभक्तिमार्गप्रतिपाद्यं सर्वश्रुतिश्री
भागवतगीतादानेकालौकिकप्रमाणसिद्धं पूर्वोक्तप्रमेयमूलभूतं साक्षा
त्पुरुषोत्तमस्वरूपं सर्वमूलत्वेन मङ्गलार्थं स्तुवंति॥ प्राकृतधर्मानाश्रयमप्राय
मिति॥ प्राकृताः प्रकृतिजन्याः ये धर्माः सत्वादयः तेषामनाश्रयं तद्धर्म
संबंधमात्ररहितमित्यर्थः। ननु प्राकृतधर्मानाश्रयत्वोक्त्या तदि
तरधर्माऽप्रसिद्धेः स्वरूपस्य निर्द्धर्मकत्वमायातीतिशंकाव्युदासार्थमाहुः
ऽप्राप्राकृतअनिखिलधर्मरूपमिति॥ऽप्राप्राकृताः प्रकृतिसंबंधरहिताः ऽप्रलौ·

किकाः आनन्दमयाः येनिखिलाः सर्वेधर्माः देहेन्द्रियप्रभृतयः तद्रूपंतत्स्वरूपमि
त्यर्थः । अत्रदेहेन्द्रियादीनामपितद्रूपत्वोक्त्यातेषामपिस्वरूपवदानन्दरूप
त्वमेवनतुलौकिकशरीरवदात्मानात्मकृतोभेदोत्राप्यस्तीत्यर्थः । इ
तिनिगमप्रतिपाद्यमिति । इतिशब्दोत्र प्रकारवाची । तेनअनेनप्रकारेणपू
र्वोक्तेनयत् श्रुतिप्रतिपाद्यंपुरुषोत्तमस्वरूपंशुद्धंआनन्दमात्रकरपा
दमुखोदरादिरूपंतदपिसाकृतिआकारसहितं । नतुमायावादा
दिभ्रांतशास्त्रप्रतिपादितब्रह्मवन्निराकारं । तादृशंस्तौमि । स्तुति
विषयंकरोमीत्यर्थः । ननुपूर्वोक्तैतवद्धर्मत्वेन भगवत्स्वरूपंभव
तैवज्ञायतेकथमन्यैः शास्त्रविद्भिरपिपंडितैः नप्रतिपादितंकुत्रा
पीतिचेत् तत्रहेतुमाहुः । कलिकालेति । कलिकालजनितंयत्त
मः अज्ञानंतेनछन्नाः समन्ताद्धिवृताः दृष्टयोयेषांभावः तत्त्वंतस्मा

द्विदुषामप्यधीतवेदशास्त्राणामपि संप्रति कलिकाले तस्य श्रुतप्रतिपाद्य
२ साक्षात्पूर्ण पुरुषोत्तमस्य माहात्म्यं प्रविषयः। ज्ञानागोचरः समभूत्।
यतस्ते भुवि भूलोकस्थिताः तेन तदतिरिक्त भगवल्लोकस्थितानां
तन्माहात्म्यं ध्यानगोचर एवेत्यर्थः। समभूत्। सम्यक् श्रुत्युक्त प्र
कारेण ज्ञानगोचरो नाभूदित्यर्थः। ननु भवतामपि भुव्येव प्राकट्या
त्तन्माहात्म्यं कथं ज्ञानगोचरं इत्याशंका निरासाय स्वज्ञानगोच
र प्रकारमाहुः। दययेति। दययास्वकीय निरूपधिदुःख प्रहाणे
च्छया निजं स्वकीयं माहात्म्यं पुष्टिमार्गीयत्नोत्वारसभावात्म
कं पूर्वोक्त प्रकारेण सर्वज्ञानाविषयं तादृशं वाण्या स्ववचनद्वा
रा स्वकीयेषु प्रकटं करिष्यन् स्वास्यं स्वस्य पुरुषोत्तमस्यैवा २
नन्दमात्राधिदैविकाग्निरूपं यदास्यं मुखं तत् प्रादुर्भूतं च

कारं प्रकटं कृतवान् ।ऽत आस्यं प्रादुर्भूतं चकारेत्येतावतैव चारितार्थ्ये
चिपत्स्वपदमुक्तं तेनांशकलाद्यवतारवत्कमपि धर्मं स्थापयित्वा
ऽऽचार्याणामपि यत्किंचिद्वक्तृत्वादि धर्मस्थापनेनास्य स्वरूप
त्वं भविष्यतीत्याशंकानिरासायोक्तं स्वास्यं प्रादुर्भूतं चकारेति।
यथास्थितस्यैव वस्तुनो दर्शनं प्रादुर्भावो न तु ऽविद्यमान
स्य जनितस्यापि प्रदर्शनं प्रादुर्भावः । तेन आचार्याणामपि य
थास्थितसाक्षात्पुरुषोत्तमश्रीमुखत्वेनैव प्रादुर्भावो न तु क
ल्प्यांशांतरत्वं तथा ज्ञापयितुमेवेत्येतद्रूपनायेमुक्तं स्वास्य प्रादुर्भू
तं चकारेति । ननु भगवतः स्वतः सर्वार्थपूर्णस्य किमेतावत्क
रणेषु प्रयोजनमिति चेत्तत्राहुः हरिरिति । यतः स्वीयानां स
र्वदुःखहर्त्ता यदि स्वास्यं न प्रकटयेत् तदा सर्वेषां स्वीयानामे

तन्मार्गीयमहात्म्यज्ञानात्तज्जनितं दुःखं तिष्ठेदेवेति स्वस्यह
३ हरित्वमेव न स्यादतः स्वस्य हरित्वं सिद्ध्यर्थं । मयैतावत्कृ
तवानिति ज्ञापनार्थं मयोक्तं हरिरिति हि युक्तश्चायमर्थः ।
यदि हरित्वेन स्वास्य प्राकट्यं न कुर्यात्तदा सा साक्षाद्भक्तिमा
र्गीयमाहात्म्यप्राकट्याभावात्स्वीयानां सर्वपुरुषार्थसि
द्धिर्न स्यादित्यत उक्तं हीति । हि इति पाठे स्वकीयानामपरि
तावदलौकिककरणां कृपयेति प्रभोरत्यंतभक्तपरत्वं
ज्ञात्वोक्तं हि इति एतेन स्वस्य फलमार्गीयमाहात्म्य
ज्ञाने स्वास्य प्राकट्यमसाधारणो हेतुरुक्त इति स्वस्य
ज्ञानमितरेषामज्ञानं च सिद्धमिति नकाप्यनुपपत्तिः । एवं ३
भगवत्परत्वेन श्लोकार्थमुक्त्वाऽऽचार्यपरत्वेनापि श्लोका

र्यमुक्त्वा आचार्यपरत्वेनापि श्लोकार्थमुच्यते । प्राकृतधर्मा
नाश्रयमित्यादि । श्रीमत्पितृचरणाः श्रीमदाचार्याणामलौ
किकनामानि प्रकटयितुमाचार्याणां स्वरूपं तत्प्राकट्ये हेतुं
च वक्तुं स्वीयातिरिक्तानामाचार्यस्वरूपज्ञानाभावहेतुं
स्वीयानामाचार्यस्वरूपज्ञाने हेतुं च वक्तुमाचार्यस्वरूपं
निरूपयन्ति । प्राकृतेति । प्राकृतेति पूर्ववत् । निगमप्र
तिपाद्यमिति । यद्यप्याचार्योद्देशेनाचार्यस्वरूपं निग
मे प्रतिपाद्यत्वेन न श्रूयते । तथाप्याचार्याणां साक्षात्पु
रुषोत्तममुखारविन्दाधिष्ठातृत्वेन साक्षात्पुरुषोत्तमा
खिलधर्मवत्त्वात्पुरुषोत्तमस्य च सकारानन्दमयत्वेन

श्रुतिप्रतिपाद्यत्वादाचार्याणामपि तदास्यत्वेन श्रुतिप्रतिपाद्यत्व ४
मेवेति ज्ञापनायोक्तं निगमप्रतिपाद्यं यत्तद्बुद्धं साकृतीति । एवमाचा
र्याणामपि तदास्यत्वेन श्रुतिप्रतिपाद्यत्वमेवेति ज्ञापनायो
क्तं निगमप्रतिपाद्यं यत्तद्बुद्धं साकृतीति । एवमाचार्याणाम
पि श्रुतिप्रतिपाद्यत्वं निरूप्य तत्स्तुतिं प्रतिजानते । स्तौमीति । स्तुतिविष
यं करोमीत्यर्थः । ननु भगवन्निरूपितैतावद्धर्मवत्त्वेनाचार्यस्वरूपं क
थमन्यैः शास्त्रविद्भिरपि पण्डितैर्न प्रतिपादितं कुत्रापीति चेत् तत्र हे
तुमाहुः । कलिकालेति पूर्ववत् । तस्यऽप्राचार्यस्यऽप्रतः परं स्व
स्यऽप्राचार्यस्वरूपज्ञाने हेतुमाहुः । दययेति पूर्ववत् । ऽअत्रापि
तृचरणानां सिद्धवत्कारेणाचार्याणां पुरुषोत्तमास्य कथनस्या
यमाशयः । भगवदाज्ञया श्रीभागवतगूढार्थविवरणारंभे 8

श्राचार्यैरेवस्वातिरिक्तस्य श्रीभागवतगूढार्थाज्ञाने प्रयत्तस्य निवेचितु
मितिप्रयत्तस्य विवेचितुं नहि विमुर्वैश्वानराद्वाक्यतेरन्यस्तत्र विधा
यमानुषतनुं मां व्यासवद्धो पतिः। दत्वाज्ञां चक पावल्यो कनपट्ट
ये स्मादतो हं मुदा गूढार्थं प्रकटी करोमि बहुधा व्यासस्य विघ्नो ;प्रि
यं ॥१॥ तस्य श्रीभागवतस्यार्थं विवेचितुं सोपपत्तिकमविरोधे
न प्रकटीकर्त्तुं वाक्यते वैश्वानराद्न्यो न विमुनेसमर्थः। यद्यपि
केवलं वैश्वानरोत्तया स्यार्थं विवेचनस्य संभवेपि यद्वाक्यते
रित्युक्तं तद्देवतारूपाश्यात्मिकाग्निव्यावृत्तिपूर्वकं साक्षा
त्पुरुषोत्तममुखारविन्दरूपाधिदैविकानंदाल्लौकिकवह्नित्व
ज्ञापनाय पतित्व निरूपणं। अत्र श्रीभागवतार्थ कथने साक्षा
त्स्वरूपप्राकट्य व्यतिरेकेण कथनं न संभवतीति श्रीपतिर्भक्त

सहितः पुरुषोत्तमः मां स्वास्यरूपं मानुषतनुं मानुषस्यतनुरिवतनुर्य
५ स्य। एतेन तन्मोमेनुष्याकारत्वमेव निरूपितं तनुमनुष्यात्वमपीति ज्ञा
पनायोक्तं मानुषतनुमिति। विधाय कृत्वा। श्रीभागवतार्थ कथनेस्व
तत्त्वाज्ञां च दत्वा। स्वतत्त्वदानेहेतुः। कृपावलोकनपटुरिति। स्वी
येषु भक्तिमार्गांगीकृतेषु यत्कृपावलोकनं तत्रपटुः समर्थः य
स्मात्कृपावलोकनपूर्वकमाज्ञादत्तवानतोहं मुदा कृपाव
लोकनपूर्वकाज्ञादानजनितसंतोषेण श्रीभागवतस्य गूढं
भगवत्कृपावलोकनरहितैरज्ञातमर्थं प्रकटीकरोमि। प्र
त्रगूढार्थं कथयामीत्यनुक्त्वा यत्प्रकटीकरोमीत्युक्तं तेन विद्य
मानस्यैवार्थस्य कथनं न तु स्वबुद्ध्याकल्पितस्यापीति ज्ञा
पनायोक्तं गूढार्थं प्रकटीकरोमीति। बहुधा सर्वप्रकारैर्व्या ५
सस्यकृष्णद्वैपायनस्य समाधौ श्रीभागवतार्थ द्रष्टुः स्वस

माधिदृष्टश्रीभागवतार्थत्वात्प्रियं। पुरुषोत्तमाज्ञयातदभिप्रेतगूढार्थ
प्रकटनाद्विष्णोः श्रीपुरुषोत्तमस्यापिप्रियं। इलोके स्वस्य ज्ञाने वाक्प
तित्वेन वैश्वानरोक्त्या साक्षात्पुरुषोत्तममुखारविन्दाधिष्ठातृत्वं नि
रूपितं। तत्रहेतुः। श्रीभागवतस्यद्वादशांगत्वेन पुरुषोत्तमरूपत्वा
त्पुरुषोत्तमस्वरूपं पुरुषोत्तमस्यैवगम्यं नान्यस्येति अतएव गीता
स्वामिपिअर्जुनेनोक्तं। नहि ते भगवन्व्यक्तिं विदुर्देवानदानवाः। स्व
यमेवात्मनात्मानं वेत्थत्वं पुरुषोत्तमेति। तस्मादाचार्याणां पुरुषो
त्तमस्वरूपनिरूपकत्वान्निरूपणस्यवाग्रूपत्वदो चार्याणां श्रीभा
गवतार्थनिरूपकत्वाद्वाग्रूपत्वपिवाचःअप्रास्यएव सत्वादाचार्यो
णां मास्यरूपत्वमेवेतिज्ञापनायोक्तं एवास्यं प्रादुर्भूतं च का
रहीति अप्रतः परमास्यरूपेणाविर्भूय प्रकटितसुबोधि
न्यादिस्वसिद्धांतग्रंथानां गूढार्थत्वेनस्वीयानामपिसम्यक्त्व

दर्थविवोधनाभावादकृतार्थतैवभवेदिति यथास्वीयानां
तदुक्तार्थावबोधेपिनकृतार्थताभवेत्। तदर्थंतदुक्तार्थावबोध
प्रकारस्थापनायामहात्म्यस्थापनायासाधारणंसाध
नमाहुः। तदुक्तमपीति। ननुभवद्भिः स्वस्यसाक्षाद्भक्तिमा
र्गीयमाहात्म्यज्ञानेनभगवदास्यप्राकट्यंहेतुरुक्तः तेनभ
वतांतन्माहात्म्यज्ञानसंपत्तिः सर्वोपिसिद्धैवेतिपुनस्तन्ना
माष्टोत्तरशतप्राकट्येकोहेतुरितितत्प्राकट्यप्रयोजनमाहुः।
तदुक्तमपीति। यद्यप्यस्माकंतदर्थंप्रकटितेमुखारविन्दरू
पाचार्यानुग्रहवशात्तदुक्तसुबोधिन्यादिपुराणार्थावबोधो
ऽजनितथाप्यधुनिकानांतदीयानांजीवत्वेनाल्पबुद्धिम
त्वात्सुबोधिन्यादीनांतात्पर्यानवगमादकृतार्थतैवसं
पद्येतेतियथातेषामपितत्तात्पर्यावबोधोभवेत्तदर्थमुपा

नन्दमयत्वादलौकिकत्वमुपपाद्य सर्वत्र नामग्राहकग्रे छन्दर्षिदेवतानियम
मस्यावश्यकत्वादाचार्यनाम्नामानन्दमयत्वेनालौकिकत्वात्तद्दृष्टु
ऋषेरपिऽप्रलौकिक एवापेक्षित इति ऋषिस्वरूपं निरूपयति ।। ऋषि १ः३ ऋं
रग्निकुमारस्त्विति । ननु सहस्रनामादिद्रष्टॄणामपि शिषित्वा
देतदष्टोत्तरशतनामद्रष्टुरपि तत्तुल्यत्वमस्त्वित्यऽऽशंका निरा
सायात्र तु शब्दः । तेन एतन्नामद्रष्टुः ऋष्यंतरापेक्षयाऽप्रलौकिक
त्वं ज्ञाप्यते । अन्येषां ऋषीणां ऋषिगणानायां प्रसिद्धत्वात्तदृष्टमंत्र
सहस्रनामादीनामपि वेदपुराणसिद्धत्वेनापूर्वद्रष्टृत्वाभावा
न्नालौकिकमृषित्वं । प्रकृते त्वाचार्याष्टोत्तरशतनाम्नां वेदपुराणे
षुऽप्रप्रसिद्धत्वेन सर्वाज्ञातत्वात्तद्द्रष्टा ऋषिःऽअन्येभ्य सर्वेभ्यः
विशिष्यत इति एतदृषेरग्निकुमारत्वमुक्तं । तत्रायमाशयः । य
था एतदन्यर्षीणां वेदःपुराणोक्त मंत्रनामद्रष्टृत्वादुद्दमर्यादा

७ यांतराभावाद्यथावत्तेषामयवबोधोभवेत तदर्थमेवाचार्याणामेवा
ष्टोत्तरशतसंख्याकानिनामानि प्रवक्ष्यामि। प्रकर्षेण कथ
यामीत्यर्थः। यद्यपि तन्नामाष्टोत्तरशतं वक्ष्यामीत्येतावतै
वचारितार्थे त्वेपि यत् प्रशब्दोपादनन्तदे तन्नाम्नां नित्य
त्वेन पूर्वसिद्धानामेव प्राकप्रकरणं प्रशब्देन द्योत्यते। यतः
एतन्नामाष्टोत्तरशतं पूर्वोक्तधर्मविशिष्टमत एव तदुक्ता
र्थावबोधप्रतिबंधनाशकमित्याहुः। अखिलाघहदिति।
यद्यपि लोके अघशब्दस्य पापवाचकत्वं प्रसिद्धं। तदाचार्य
प्रकटितभक्तिमार्गानुवर्तिनां तत्संभावनापि दूरतरेति। अ
त्राघशब्देन सुबोधिन्याद्यर्थावबोधप्रतिबंधस्यैवाघरूप
त्वात्तन्नाशकत्वमेतन्नामाष्टोत्तरशतस्यैवेति ज्ञापनार्थमु ७
क्तमखिलाघहदिति। एवमाचार्यस्वरूपस्य तन्नाम्नां चा

नन्दमयत्वादलौकिकत्वमुपपाद्य सर्वेचनाम प्राकट्ये छन्दार्षीदि
वतानियमस्यावश्यकत्वादाचार्यनाम्नांमानन्दमयत्वेनालौ
किकत्वात्तद्द्रष्टा ह्यृषिरपि ऽलौकिक एवापेक्षित इति ऋषि
स्वरूपं निरूपयन्ति ऋषिरग्निकुमारस्त्विति। ननु सहस्रना
मादिद्रष्टॄणामपि ऋषित्वादेतदष्टोत्तरशतनामद्रष्टुरपि
तत्तुल्यमस्त्विति आशङ्कानिरासायाचतु शब्दः। तेन एतन्ना
मद्रष्टुः ऋष्यन्तरापेक्षयाऽलौकिकत्वं ज्ञाप्यते। अन्येषां ऋ
षीणां ऋषिगणनायां प्रसिद्धत्वात्तद्दृष्टमन्त्रसहस्रनामादीना
मपि वेदपुराणसिद्धत्वेनापूर्वद्रष्टृत्वाभावान्नालौकिकमृ
षित्वं। प्रकृते त्वाचार्याष्टोत्तरशतनाम्नां वेदपुराणेष्वप्रसिद्ध
त्वेन सर्वोत्तमत्वात्तद्द्रष्टा ऋषिः अन्येभ्य सर्वेभ्यः विशिष्यत
इति एतदृषेरग्निकुमारत्वमुक्तं। तत्रायमाशयः। यथा एतद

न्यर्षीणां वेदपुराणोक्त मंत्रनामद्रष्टृत्वाद्धुद्ध मर्यादा मार्गीयत्वं तथा
८ चापि ऋषित्वेप्यग्निकुमारत्व कथनाद्धुद्ध पुष्टिमार्गीयत्वमुक्तं । ते
न यथा व्रतवरदान प्रस्ताव निरूपणे सर्ववेदपुराण प्रसिद्धत्वेन सर्वा
ज्ञातो मंत्रः कात्यायनि महाभागे इति तत्प्रति पाद्य देवतासहितस्तै
रेव दृष्टो नान्यैस्तथैवेतान्यथाचापि नामानि वेदपुराण प्रसिद्ध
त्वेनान्यज्ञातान्येभिरेव प्रकटीकृतानीत्येतन्नाम प्रकटन एते
षामेव ऋषित्वमिति ज्ञापनायाग्निकुमारत्वोक्तिः यथाग्निकुमा
रैः प्रकटित मंत्रकृत पूजापाः क्रमेणावांतर फलपरम फलप्राप्ति
रभूत् । तथैवैतत्प्रकटित नाम पाठात क्रमेणैतन्मार्गोक्तावांत
र फलं परमफल प्राप्तिः संपत्स्यत इति ज्ञापितं भवति ०प्रथवा । एव
स्मिन्नग्निकुमारत्व सूचितमर्थं गोपयितुमाचार्याणामग्नित्व
प्रसिद्ध्या स्वस्य तदात्मजत्वेनाग्निकुमारत्वमुक्तमित्यर्थः । ऋषिं ८

न्निरूप्यऽतः परं छन्दो निरूपणमाहुः। नाम्नां छन्द इति। नाम्नां सहस्र
नामाष्टोत्तरशतनाम्नां जगति यत्प्रसिद्धं छन्दस्तदत्रापि सर्वोत्तम
स्तोत्रे छन्द इत्यर्थः। छन्दो निरूप्यातः परं देवता निरूपणमाहुः।
श्रीकृष्णः स्वयंऽसौ देवता। ऽत्र श्रीकृष्णपदोक्त्या भक्तसाहित्यक
थनेन तत्पोलारसाविष्टत्वमुक्तं। तदास्यकथनेनैतन्मार्गी
यालौकिकाधिदैविकानंदमयाङ्गिनरूपत्वमुक्तं। तस्य देवतात्व
कथनेनैतत्स्तोत्राधिष्ठातृत्वमेतत्स्तोत्रोक्तफलदातृत्वं च ज्ञापि
तं। केवलं फलदातृत्वमेव न किंतु स्वस्याप्येतत्फलभोक्तृत्वम
प्यस्तीत्येतदुभयसमुच्चयार्थं चकारः। ननु ब्रह्मादिदुर्लभस्य
मर्यादामार्गीयश्रुत्यगम्यस्य फलस्य स्वकीयेश्वेवैतत्फलदाने किं
बीजमित्याकांक्षायामाहुः। बीजं कारुणिक इति॥ स्वीयेषु निरूप
घ्य साधारणकरुणावत्वज्ञापनार्थमुक्तं कारुणिक इति॥ यदि

६ इतरभगवन्मार्गीयानामपि वत्स्वीयानामपि मुक्तिमेव दद्यात्तदा स्वप्रकटि
त पुष्टिमार्गफलानधिकारत्वेन शुद्धपुष्टिमार्गीत्वं न स्यात् । अतः
स्वीयान् सर्वतः पृथक्कृत्य स्वप्रकटितशुद्धपुष्टिमार्गीयफलदानेन
सर्वोत्कर्षसिद्धौ करुणावत्त्वमेव बीजमिति ज्ञापनायोक्तं बीजजं
कारुणिक इति । ननु पूर्वोक्तकरुणावत्त्वेप्येतत्फलस्य सर्वाति
शयत्वेन भगवताप्यंतरंगभक्तेष्वेव प्रकटितस्य दाने कथं सामर्थ्य
मिति चेत्तत्राहुः । प्रभुरिति । प्रभुत्वेनात्यसाधारणासामर्थ्याज्ज्ञा
दृशफलस्यापि दाने सामर्थ्यं ज्ञापनार्थमुक्तं प्रभुरिति । एवं बीज
त्वं उपपाद्य तत्स्तोत्रपाठस्य कुत्र विनियोग इत्याकांक्षायामाहुः ।
विनियोग इति । भक्तियोगे यः कश्चन प्रतिबंधः दृष्टादृष्टरूपस्त
स्य विनाशने विशेषेणानाशने मूलोच्छेदने एतत्स्तोत्रस्य विनियो ६
गः प्रयोजनमित्यर्थः । अत्र भक्तौ केवलभक्तिपदं विहाय योग

पदोपदानादुक्तेरनेकविधत्वेन भक्तियोगो बहुविध इत्यत्र भक्ते
रनेकफलसाधकत्वेन निरूपणात्प्रकृते योगपदोपादानं भगवता
सह योगः साक्षात्संबंधस्तत्र प्रतिबंधविनाशनेऽस्योपयोग इत्य
र्थः एवं विनियोगमुक्त्वा तत्साध्यं फलमाहुः। कृष्णाधरामृतास्वा
द इति। यद्यपि प्रसिद्धार्थस्यातिदुर्लभत्वे न सर्वत्र देयासंभवादत्रा
स्वादपदोपादानादाद्यौपदर्थत्वमेवाभिप्रेतं तेन यथा गवादी
नां वेणुनादश्रवणद्वारा द्रौपदनुभवकर्तृत्वं तथैतत्स्तोत्रपाठक
र्तृणामपि यथाधिकारं मुख्याधिकारीतरव्रजवासिवदत्रा
हिमतत्स्तोत्रे सिद्धिः फलसिद्धिरित्यर्थः। फलसिद्धेरावश्यकत्व
ज्ञापनार्थमाहुः। न संशय इति। एवं फलपर्यन्तं निरूप्यातः परं ना
म निरूपणप्रस्तावे तद्धेतुकस्वरूपस्मरणे जाते तज्जनितानन्द
भरेण स्वरूपे केवलानन्दत्वस्फूर्त्या प्रथमतः आनन्दत्वेनैव

नामनिरूपणमाहुः आनन्द इति । यद्यपि मनसि प्रत्यानन्दनरवशा
२० त्पुरुषोत्तमाक्षरानन्दयोस्तारतम्यास्फूर्त्या केवलमानन्द इत्येवो
क्तं तथाप्यग्रिमनामविचारे प्राच्यापौराणां पुरुषोत्तमास्यत्वेनागणि
तानन्दस्फूर्त्या गणितानन्दत्वेनानन्दत्वमक्षरेपि वर्त्तेत इत्यत्र प्रा
सापेक्षुतद्वावृत्त्यर्थमाहुः । परमानन्द इति । परमः प्रगणितानन्दः यतो
वाचो निवर्त्तन्त इति श्रुतिप्रतिपाद्यो यः पुरुषोत्तमानन्दस्तद्रूप इत्यर्थः ।
ननु पूर्णस्य लोके प्रकटस्य पुरुषोत्तमत्वे किं प्रमाणमिति चेत्त
त्राहुः । श्रीकृष्णास्यमिति । श्रीकृष्णपदेन शुद्धभक्तिमार्गीय
रसात्मकपुरुषोत्तमत्वेन तदास्यस्यापि तथात्वं युक्तमेवेति
नाशंकनीयं किंचित् । ननु तदास्यस्यापि तत्तुल्यत्वेन यथा स प्र
लौकिकव्रजे प्रकटस्तथा तदास्यस्याप्यलौकिके एव प्राकट्यमुचितं ।
न तु लौकिके ष्विवत्याशंकानिरासायाहुः । कृपानिधिरिति । कृपा २०

पा: निधि: निधानं।। निरुपधय लौकिककृपाश्रय इत्यर्थ: कृपाविषयाणां लौकि
केषु ष्वेव प्राकट्यात्वस्यान्यत्र प्राकट्ये एतेषु कृपाविषयत्वासंभवात्कृ
पानिधित्वमेव न स्यादिति लौकिकेषु प्राकट्यहेतुत्व ज्ञापनायेमुक्तं कृ
पानिधिरिति तथापि कृपानिधित्वेपि स्वांगीकृतेषु स्वप्रकटितभक्ति
मार्गीयसाधू। भगवत्संबंधरूप फलदानं कथं सम्भवतीत्याशंका
निरासाय निधि पदोपादानं तस्यायमाशय:। यथा समुद्रस्य जलनि
धित्वेनागाधजलमुच्यते: तेन यथाऽगाधे पतितं पात्रं महदल्पं
वा पूर्णमेव भवति तथाऽप्राचार्ये प्रकटित भक्तिमार्गाङ्गीकृतानां य
थाधिकारं फलानुभवो भवत्येवेति ज्ञापनाय निधि पदमुक्तं ननु ते
वै कृपाविषया: यद्यपि अलौकिकेषु प्राकट्यमकृत्वायल्लौकिकेषु प्रा
कट्यं कृतवान् तदर्थं कृपाविषयानाहु:। देवोद्धारेति। देवा: भगवदुक्त
देवसृष्टौ प्रादुर्भूता: ये जीवा: पुष्टिमार्गीयाङ्गीकृत देवजीवा इत्यर्थ:।

तेषामुद्धारे यः प्रयत्नः तस्मिन्नात्माऽन्तःकरणं यस्य सः ननु देवस्य
२२ ष्युत्पन्नानां मुक्तिं फलसिद्धये वेदपुराणोक्त साधनानि सिद्धान्ये
व सन्तीति किमाचार्य प्राकट्येनेति चेत् सत्यं। भगवता पुष्टि
मर्यादा मार्गभेदेन जीवानामङ्गीकारान्मर्यादा मार्गे फलसा
धकत्वेन पूर्वोक्त साधनानां मर्यादा मार्गीय फलसाधकत्व
मस्तु नाम शुद्ध पुष्टि मार्गीयाणां मुक्ति फलातिरिक्त साक्षाद्भ
गवत्संबंधस्यैव फलत्वात्तत्साधनानामन्यत्राप्रसिद्धत्वेन शुद्ध
पुष्टि मार्गीयैकगम्यत्वेन तदितराज्ञानादेतन्मार्गीयाणा
मनुद्धार एव भवेदित्येतन्मार्गप्रकटनं निरर्थकमेव भवेदतः २
तन्मार्गीयाणां यथैतन्मार्गफलसिद्ध्या उद्धारो भवेत्तदर्थमवा
चार्याणां प्राकट्यमिति ज्ञापनायोक्तं दैवोद्धारप्रयत्नात्मेति २२
दैवाः पुष्टिमार्गीयजीवा इत्यर्थः शुद्धपुष्टिमार्गाङ्गीकृतजीवा

नामे तन्मार्गांगीकारबलस्वभावाच्चेदितरमार्गीयफले फलत्वाभावस्फू
र्त्याः स्वमार्गीयफलसाधनयोः स्वतोऽज्ञानात्स्वोद्धारविषयिण्या
र्त्तिः सदास्तीत्यस्त्येव यदाऽऽचार्यैः प्रकटीभूय शुद्धपुष्टिमार्गः प्राक
ट्यं कृतं स्वीयेषु तदाऽऽचार्यचरणारविन्दस्मरणमात्रेणैव स्व
मार्गीयफलनिश्चयज्ञानात्तत्पूर्वं स्वस्मिन्स्वमार्गीयफलनि
श्चयाज्ञानजनितस्वकृताधिताऽऽर्त्तिः सर्वापि समूलाऽऽगतेत्येतद्रूप
माधिमुक्तं स्मृतिमात्रार्त्तिनाशन इति ॥ अथवा । स्वकीयेषु स्वमार्गी
यासाधारणार्त्तिनाशकत्वमुक्तसाधारणैवत्येतच्चरणारविं
दस्मरणस्य तत्तन्मनो निष्टार्त्तिशामकत्वसामर्थ्यमप्यस्ती
ति ज्ञापनायोक्तं स्मृतिमात्रार्त्तिनाशन इति । ननु तत्प्रकटितशु
द्धपुष्टिमार्गस्य स्वकीयानां तन्मार्गोक्तफलानुभवात्सर्वतो
ऽव्यभिचारिप्रामाण्यज्ञानमस्त्येव तथाप्याचार्यस्वरूपज्ञान

वतां पंडितानामपि कदाचित्प्रवर्त्तितशुद्धपुष्टिमार्गे तन्मूलाज्ञानाद
१२ प्रामाण्यशंका भवेदिति तत्प्रामाण्यार्थं स्वप्रकटितमार्गद्वयसमूल
त्वज्ञापनार्थं तन्मूलज्ञानप्रकाशकत्वमाहुः । श्रीभागवतगूढार्थप्र
काशनपरायणा इति । श्रीभागवतपदात्तदेवैतन्मार्गे मूलमित्युक्तं ।
ननु श्रीभागवतमन्यैरपि व्याख्यायते एवं यदि तत्राप्ययं मार्गः प्रकटो
भवेत् तदाऽन्यैरपि ज्ञायेतैवेति शंकानिरासायाहुः । गूढार्थेति । य
द्यपि सर्वैरपि श्रीभागवतं व्याख्यायत एव तथापि तत्रत्यो गूढः स
र्वाज्ञातः यःऽपर्थः फलमार्गीयशुद्धपुष्टिमार्गफलरूपस्तत्प्रकाश
नैतत्प्राकट्यकरत्वेपरायणाः तदेकविचाररतिष्ठः । एतेन श्रीभाग
वतगूढार्थविचारकत्वेन साक्षात्फलमार्गीयपुष्टिमार्गप्रकटन
सामर्थ्यमाचार्याणामेवान्येषामेतन्मार्गाज्ञानादविचारकत्वमिति १२
ज्ञापनायोक्तं श्रीभागवतगूढार्थप्रकाशनपरायणा इति । ननु श्री

भागवते मुक्त्यादेरपि फलत्वनिरूपणात्कथं भवद्विचारितस्यैव फल
त्वमिति चेत्। सत्यं। श्रीभागवते शुद्धपुष्टिमार्गीयफलस्यैव फल
त्वकथनात्तस्यैव फलत्वं नान्यस्येति शुकैरपि श्रीभागवतस्य नि
गमकल्पतरोरिति श्लोके फलनिरूपणेऽपि पिबत भागवतं रसमाल
यमिति एतन्मार्गीयफलस्यैव फलत्वनिरूपितं नान्यस्येत्यस्यै
व फलत्वं न तु पिबत भागवतं रसमालयमिति पदैः कथं तस्यैव फल
त्वमायातीति चेत्। अत्र वदामः। श्रीभागवतस्य शब्दात्मकत्वाच्छ्र
वणस्यैव प्राप्तत्वाच्छृणुतेति पदमनुक्त्वा यद्रसं पिबतेत्युक्तं तेन श्री
भागवते शब्दप्रतिपाद्यः कश्चन रसासाधारणो रसोस्तीति ज्ञायते।
तस्य विचारे क्रियमाणे तस्यैव हेतोः प्रयतेतेति श्लोके भक्ताविव
पुरुषप्रयत्नस्योक्तत्वात् श्रीभागवतप्रतिपाद्यो रसो भक्तिरस
एवेति निश्चीयते तस्य पानं, अन्तः प्रवेशनं यथा बहिःस्थितदु

दुग्धादेर्मुखद्वारा ऽन्तः प्रवेशनमेव पानं तथा श्रीभागवतप्रतिपा
२३ द्यभक्तिरसस्यान्तः प्रवेशनमेव पानं । यद्यपि श्रीभागवते भक्ति
योगो बहुविध इत्यनेकविधः भक्तियोगस्तत्तत्फलसाधकः नि
रूपितोऽस्ति तथापि श्रीभागवतेन तस्य मुख्यत्वं मुक्त्यादिफल
साधकत्वात् । श्रीभागवतप्रतिपाद्यभक्तिरसस्यालयत्वकथनेना
त्राहुः ईशदर्थवाचकत्वेन लयपदस्य च मुक्तिवाचकत्वेन मुक्त्या
दिकफलसाधकत्वाच्छुद्धपुष्टिमार्गीयफलस्यैव फलत्वं नान्यस्ये
ति प्रमाणपूर्वक प्रतिपादनसामर्थ्यमाचार्याणामेव नान्येषा
मपीति ज्ञापनायाहुः । श्रीभागवतगूढार्थप्रकाशनपरायण
इति । ननु पुष्टिमार्गीयफलस्य मुक्त्यादिकाकथनेन स्वरूपानं
दात्मकत्वात्तदनुभवः कथमित्याकांक्षायामनुभवप्रकारहेतु
भूतं नामाहुः । साकारेति । साकारं यद्ब्रह्म तस्य वादः सोपपत्तिकं २३

कथनमितियावत् तस्यैव मुख्यत्वेन स्थापकः प्रतिपादक इत्यर्थः।
अत्रैकशब्दो मुख्यवाची। साकारत्वमुक्त्वा ब्रह्मत्वं निरूपितं त
द्यथा। ब्रह्म केवलानन्दमयं तत्करचरणादीनामपि केवला
नन्दमयत्वं ज्ञापितं। साकारत्वकथनेन पुष्टिमार्गीयफलस्य सर्वे
न्द्रियास्वाद्यत्वं फलानुभवप्रकार इत्युक्तं भवति। अत एव व्रज
सीमन्तिनीभिरपि श्रुतिरूपाभिरनेकश्रुतिसंमत्या अध्वस्वतां
फलमिति श्लोके प्रथममेव फलानुभवप्रकार उक्तः। तेन नानु
पपन्नं किंचित्। ननु इयदवधि सर्वशास्त्रार्थविचारकैरपि ब्र
ह्मणः साकारत्वानिरूपणात् कथमाचार्याणामेव साका
रत्वनिरूपकत्वमित्याशंक्य तत्रोपपत्तिमाहुः। वेदपारग इ
ति। अत्रायमाशयः। ब्रह्मणः अलौकिकत्वाच्चक्षुरादीनां लौ
किकप्रमाणत्वान्न चक्षुरादिगम्यत्वं ब्रह्मणः सम्भवतीति श्रु

तो नाम लौकिकप्रमाणत्वेन श्रुतयस्तं ब्रह्मणि प्रमाणमिति तत्प्रतिपाद्यमे
२४ वब्रह्म तास्तु सईक्षां चक्रे तस्मादेकाकी न रमते इति द्वितीयमैच्छत्स हैतावा
नासेति साकारत्वमेव निरूपयन्ति। गीतासु च सर्वतः पाणिपादं तत्स
ॅ वोषं त्वादिना च साकारत्वमेवोच्यते। ननु निराकारवादिभिरपि निराकार
प्रतिपादने ऽप्रस्थूलमनण्वह्रस्वमित्याद्याः श्रुतय एव प्रमाणत्वेनां
गीक्रियन्त इति कथं निराकारत्वसिद्धिरिति चेत्। तत्र वदामः नि
राकारत्वप्रतिपादिका अपि श्रुतयो ब्रह्मणो देवाद्याकारवत्प्राकृता
द्याकारवत्त्वमेव निषेधंति न त्वानन्दमात्रकरपादमुखोदरादिम
त्त्वं। यदि सर्वथा निराकारत्वमेव श्रुत्यभिप्रेतं स्यात्तदा निरा
कारत्वमुक्त्वा पैग्र सईक्षां चक्र इत्यादिना साकारं न प्रति
पादयेयुः। अत एव वेदान्तसूत्रमपि। प्रकृतैतावत्त्वं हि प्रतिषेध २४
ति ततो ब्रवीति च भूय इति। अस्यायमर्थः। प्रकृतं प्राकृतं एता

वत्त्वं तन्निषेधति निराकारश्रुतिः। न त्वानन्दैकाकारवत्त्वं वदतीति।
तत्र हेतुः। ततोऽब्रवीतिचमूय इति ततोऽग्रे भूयः पुनरपि सदेक्षांचक्र इ
त्यादिना साकारत्वमेव वदति॥ निराकारवादिनां यत्किंचित् श्रुति
ज्ञानवत्वेऽपि सर्वसाक्षीयोपनिषद्ज्ञानाभावात्तासु च प्रकारभेदे
न ब्रह्मनिरूपणात्तत्र परस्परविरोधपरिहारपूर्वकविषयव्यव
स्थया यत्किंचित् तादृशं ब्रह्मेति मन्तव्यं। निराकारवादिनां
सर्वशाक्षीयोपनिषत्तात्पर्यज्ञानाभावात्स्वबुद्ध्यनुसारेण यत्किं
चिदुतितात्पर्यं स्वसिद्धांतानुसारेणाकल्पयित्वा निराकारं व
दतीति न तदुक्तं प्रमाणं ऽप्राचार्यैस्तु सर्वशाक्षीयोपनिष
त्तात्पर्यस्य विरोधपरिहारेणावगमात्तत्र च साकारस्यैव नि
रूपणात्तत्सर्वमवगम्यैव साकारत्वमुक्तमित्यत प्राहुः।
वेदपारग इति। यद्यपि साकारब्रह्मवादैकस्थापकोवेदपा

रगइतिनामद्वयार्थनिरूपणेनैव मायावादो निराकृतस्तथापिपुन
१५ र्यन्मायावादनिराकर्त्तेति निरूपितं तस्यायमर्थः मायामाश्रित्य
सर्वस्यमिथ्यात्वमसत्त्वं चेत्येवं रूपो यो वादः समायावादः सः स
र्वश्रुतिविरुद्ध इति हेतोस्तन्निराकर्त्ता। तत्रविरुद्धश्रुतीराह। तत्सृ
ष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभव
त् निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चा
विज्ञानं च सत्यं चानृतं च सत्यमभवत् यदिदं किंच तत्सत्यमि
त्याचक्षते तदप्येष श्लोको भवति। सर्वं खल्विदं ब्रह्मेत्यादि
श्रुतिविरुद्धत्वात्तन्मतनिराकरणं कृतवानित्येतद्द्योतनार्थं
मुक्तं मायावादनिराकर्त्तेति। एवं मायावादं निराकृत्य तदि
तरशास्त्राणामपि श्रुतिविरुद्धत्वात्तत्तन्मतानुसारिणां वा २५
दिनां प्रपि श्रुतिमतानुसारेणैव निराकर्त्तेति ज्ञापनायोक्तं सर्व

वादिनिरासकृदिति। यद्यपि मायावादिन्यायेन सर्वस्यापि जग
तस्ते मिथ्यात्वं न मन्यंते तथापि नैयायिकैः ईश्वरे ज्ञानेच्छाप्र
यत्नातिरिक्ता श्रुत्युक्ताऽप्रज्ञानानंदमयत्वादीन् धर्मान्नमन्यंते।
मीमांसकास्तु ईश्वरमेव न मन्यंते। सांख्यादयोपि तथेत्ये
तत्सर्वं श्रुतिविरुद्धमिति तन्निराकरणायोक्तं सर्ववादिनि
रासकृदिति। ननु लोके प्रसिद्धानां कर्मज्ञानप्रतिपादकशा
स्त्राणां वेदविरुद्धत्वेन निराकृतत्वात्स्वस्य कस्मिन् शा
स्त्रे कस्मिन् धर्मे च निष्ठेति शंकानिरासायाहुः। भक्ति
मार्गाब्जमार्तंड इति। भक्तिमार्गरूपं यदब्जं तस्य मार्तं
डः प्रकाशक इत्यर्थः। स्वस्य भक्तिमार्गप्रकाशकत्वोक्त्या
भक्तिशास्त्रं यद्गीताभागवतादिकं तच्छास्त्रे निष्ठत्वं तदु
क्तधर्माचरणत्वं च ज्ञापितं। यद्यप्यत्र कर्मज्ञानादिकमपि

प्रतिपाद्यते। तथापि तत्फलत्वेन मुख्यतया नाहं वेदैरिति यो भि
१६ नामपि सर्वेषामिति ब्रह्मभूतः प्रसन्नात्मेत्यादिभिर्गीतासु ब्रह्म
ज्ञ भावानंतरमपि भक्तिलाभस्यैव मुख्यत्वेन निरूपणात्।
श्रीभागवतेपि ॥ अनिमित्ता भागवती भक्तिर्मुक्तेर्गरीयसी। भ
जतां मुकुन्दो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगं। सामीप्य
सार्ष्टि सालोक्य सायुज्यैकत्वमप्युत भक्तिमार्गे हरेर्द्दृष्टौ स्यां ध
र्मो पर्यो हरिरेव हि। कामो हरेर्द्दिदृक्षैव मोक्षः कृष्णस्य चेद्ध्रु
वं॥ अत्र दीयमानमिति वर्त्तमानप्रयोगोपादानात्तत्तन्मु
क्तिसुखानुभवो ज्ञापितो भवति तन्न दीयमानमिति पदाद
नुभूयमानमित्यर्थः सिद्ध्यति तेन भक्तिमार्गीयाः मुक्तेः फ
लमज्ञात्वैव भक्तेरेव फलत्वं वदंतीति वादिनामाशंका निर १६
स्ता वेदितव्या। एवमेव मत्सेवया प्रतीतमित्यत्रापि ज्ञेयं प्रतीते

ऽनुभवपर्यवसायित्वात् दीयमानं न गृह्णन्ति विनामत्सेवनं जनाः।
स एव भक्तियोग्य स्यऽप्रात्यंतिक उदाहृतः। तस्मान्मद्भक्तियुक्तस्य
योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदि
हेत्यादिभिर्भक्तिरेव प्रतिपाद्यत इति गीताभागवतादीनां भ
क्तिशास्त्रत्वं ऽत्र भक्तिमार्गस्याग्नित्वोक्त्या मार्गांतरापेक्ष
याऽस्य मार्गस्य सुखदत्वं ज्ञापितं ऽप्राचार्याणां मार्त्तंडत्वोक्त्या
यथाऽग्नि प्रकाशको मार्त्तंड एव तथा पुष्टिभक्तिमार्ग प्रकाशकाऽप्रा
चार्या एव नान्ये। यथा प्रकाशितान्तर सम्भोन्कारःऽप्रलय एव
तथैतत्प्रकाशित मार्गे रसम्भोक्तारः एतदङ्गीकृता एव नान्य
इत्यपि ज्ञापितं। यथा मार्त्तंडःऽन्येषां तापजनकोपिऽप्रज्ञानां
प्रकाशकत्वेन सुखजनकः। तद्वदाचार्याणामपि भक्तिमा
र्गातिरिक्त मार्गीयाणां तापजनकत्वं। भक्तिमार्गीयाणां भक्ति

प्रकाशकत्वेनात्यंतसुखदत्वमिति ज्ञापनायाप्युक्तं भक्तिमार्गाब्जमार्त्तंड इ
२७ ति। यद्यपि भक्तिमार्गः प्रमाणसिद्धत्वात् पूर्वं वर्त्तत एव तथापि सू
र्यानुदयाद्रात्रौ कमलवत् मुद्रित एव स्थितः। तथा विद्यमानोपि भ
क्तिमार्गः, आचार्यप्राकट्याभावाद विकसित एव स्थितः आचार्यप्रा
कट्यानन्तरमेव विकासो मर्यादामार्गीयभक्तिमार्गानुवर्त्तिना
मपि तन्मार्गोक्तफलसिद्ध्याकृतार्थत्वमस्त्येव तथापि तत्र पु
रुषशरीरं प्राप्तानां ब्राह्मणानामेव मुक्त्यधिकारः नान्येषा
मिति। यथा मुचुकुन्दस्य भगवद्दर्शनानन्तरं भक्तिसिद्धाव
पि ब्राह्मणत्वाभावाद् भगवतापि न मुक्तिर्दत्ता किंत्वग्रिमज
न्मनि ब्राह्मणत्वं संपाद्यैव मुक्तिर्दत्तेति मर्यादामार्गः न सर्वेषां
फलसाधकः। आचार्यप्रकटितपुष्टिभक्तिमार्गस्तु तदङ्गी २७
कृतजीवमात्रस्यैव तन्मार्गोक्तफलसाधक इति ज्ञापना।

योक्तं । स्त्रीशूद्राद्युद्धृति क्षमा इति ननु पुष्टिमार्गेप्ययं नियमो भविष्यती
ति मर्यादामार्गीयाणामाशंका निरासाय तत्र भगवदुक्त प्रमाण
माहुः । मां हि पार्थ व्युपाश्रित्ये त्यारंभ्य किं पुनर्ब्राह्मणाः पुण्या
भक्त्या राजर्षयस्तथा । अनित्यमसुखं लोकमिमं प्राप्य भजस्व
मामित्यंते भजनस्यैवोक्तत्वाच्छुद्ध पुष्टि ~~मार्ग~~ भक्ति मार्ग प्रवृ
त्तजीवमात्रस्यै न कृतार्थत्वान्तु मर्यादामार्ग निबद्धामणस्यैवे
ति नियम इति मार्गद्वय विचार पूर्वकं तत्तौर्बल्याबल्य विचारणो
पुष्टिभक्तिमार्गस्यैव प्रबलत्वज्ञापनाय शुद्धपुष्टिमार्ग प्र
वर्त्तनमाचार्यैः स्वकृतं नान्यैरिति ज्ञापनायोक्तं स्त्रीशूद्राद्युद्धृति
क्षमा इति ॥ क्षमा इति पदेन स्वतः स्वस्व सामर्थ्येन स्वकीयानां
फलसाधनसमर्था इत्यर्थः । ननु पुष्टिमार्ग फलसिद्धावपि स
र्वत्याग पूर्वकं सर्वात्मभावादिकं साधनत्वेन श्रूयते तत्क

यमाचार्यप्रकटितमार्गे केवलमाचार्याङ्गीकारमात्रेणैव
१८ तत्फलसिद्धिरिति चेत्तत्राहुः । अङ्गीकृत्यैवेति । अत्रायमाश
यः । सर्वोत्तमभावादिनापि फलसिद्धौ भक्तेषु भगवत्प्रियत्व
मेव हेतुः नान्योऽस्तीति निश्चयः । भगवत्प्रियत्वं केवलफ
लमार्गीयेषु पुष्टिमार्गप्रवर्तकाचार्याङ्गीकारेणैव चे
त्सिद्धं किं साधनान्तरकथनेनेत्यत उक्तं । अङ्गीकृत्यैव गो
पीशवल्लभो कृतमानव इति । अत्र भगवन्नामान्तरमनु
क्त्वा यद्गोपीशपदोपादानं तत्त्वमेतदुक्तं सर्वदिव्यलीलाप
रवशत्वादाचार्याणामप्येतल्लीलापरवशत्वेन तन्मध्य
पातित्वेनातिप्रियत्वात्कृपया तदङ्गीकृतेषु स्वमार्गीयप्रभुप्रि
यत्वे किं वक्तव्यमित्येतद्द्योतनायेदमप्युक्तं मङ्गीकृत्यैव गोपी २८
शवल्लभो कृतमानव इति । नन्वङ्गीकृतौ कः प्रकार इत्या

क्षायामाहुः ।ऽङ्गीकृतौ समर्याद इति ।ऽङ्गीकृतौऽङ्गीकारे सम
र्यादः स्वमार्गीयमर्यादासहितः । साकेत्याकांक्षायामुच्यते ।
यस्त्वहं मुक्त्यधिकसाक्षाद्भगवत्संबंधं प्राप्यकृतार्थो भवा
मीति बुद्ध्वा साक्षात्फलरूपभक्तिमार्गप्रवर्त्तकत्वेनाचार्यं स्व
रूपं ज्ञात्वा तदीयत्वेनैव च स्वमनोरथसिद्धिं ज्ञात्वा मां स्व
कीयं कुर्विति प्रार्थनया प्रपन्नो भवति तं कृपया स्वमार्गमर्या
दोक्तप्रकारेण स्वसमीपं नीत्वा स्वमार्गीयोपदेशप्रकारेणोप
दिश्य भगवति निवेद्य पश्चात्स्वीयत्वेनांगीकरोतीति सोऽस्मिन्मा
र्गेऽङ्गीकारप्रकार इति ज्ञापनायोक्तमङ्गीकृतौ समर्याद इति ।
ननु जीवस्तु स्वकृतार्थतासिद्ध्यर्थं प्रत्यादिकं यद्यपि करोति तथा
प्याचार्याणां मुक्त्यधिकस्वमार्गीयसाक्षाद्भगवत्संबंधसं
पादने को हेतुरिति चेत्तत्राहुः । महाकारुणिक इति । यद्यपि मर्या

दा मार्गीया ऽऽचार्या ऽपि मुक्तिदातृत्वेन कारुणि। एवमवंतितवा
२८ प्याचार्याणां ततोऽप्यधिक पुष्टिभक्ति मार्गीय संबंध संपादकत्वा
न्महाकारुणिकत्वं। ननु मर्यादा मार्गीय फलाधिक भक्तिमार्गी
य फल साधकत्वेन महाकारुणिकत्वं उक्तं। तथापि इयद्व·
द्ये तत्फल साधकत्वं कस्यापि कुत्रापि न दृष्टं न वा श्रुतमिति
कथं महाकारुणिकत्वेऽप्येतत्फल संपादकत्वमेतेषामेव
घटत इत्याशंका परिहारार्थमाहुः। विभुरिति विभुः सर्व
करण समर्थः। एतेन इयद्वधीति त्वदुक्तानुपपत्तिरपि
परिहृता। तत्रेयमुपपत्तिः यद्यपि पूर्वं भक्तिमार्गीयावतृव
एवाचार्या जातास्तथापि भक्तियोगो बहुविध इति श्रीभाग
वतात्तत्तन्मार्गीय साधन फल विचारभेदेन तत्तन्मार्गीय साधन फल २८
परत्वमेव तेषां न तु शुद्ध पुष्टि मार्गीय साधन फल विचारभेदेन त

त्तन्मार्गीयसाधनफलपरत्वमेवतेषां नतुशुद्धपुष्टिमार्गीयसाधन
फलविचारगंधोपितत्रसंभवतीतिकृतद्दानसामर्थ्यसंभवइत्या
चार्यशांसर्वितोधिकसामर्थ्यज्ञापनायोक्तं विभुरिति। ननुशु
द्धपुष्टिमार्गीयफलदानसामर्थ्यवत्वेपितन्मार्गीयफलस्य प्रया
पिपत्पयदरजश्रुतिमृग्यमेवेति वचनात शुत्यायनेकमक्त
दुःप्राप्यत्वेनातिदुर्लभत्वा कथंददातीतिचेत्तत्राहुः। ०प्रदेय
दानदक्षश्चेति। यदि पुष्टिमार्गातिरिक्तमर्यादामार्गीयश्र
वणादिसिद्धमुक्तिंफलं स्वयमपिदद्यात्तर्हिइतरसाधा
धारणत्वाद्भगवदाज्ञया स्वप्राकट्येनस्वस्यशुद्धपुष्टिमा
ॅत्वांनिष्प्रयोज
नमेवभवेत्
किंचपं.१० र्गप्रवर्त्तकत्वेनयदिमुक्त्यधिकफलंनदद्यात्तर्हिस्वस्य
स्वप्रकटितशुद्धपुष्टिमार्गस्यच प्राकट्यमसाधारणप्रयो
जनाभावाद्व्यर्थमेवभवेदत उक्तमदेयदानदक्षश्चेति।०प्र

देयं भगवद्व्यतिरिक्तेन यद्दातुमशक्यं तस्यापि दाने दक्षः अति
२० समर्थ इत्यर्थः। यद्येवं तर्हीतरमार्गसाधनप्राप्यमुक्त्यादि
फलदाने सामर्थ्यं तस्येतरशक्यफलदानेकः प्रयास इ
त्यपि ज्ञापितं भवति। यद्यपि प्रदेयदानसामर्थ्यमस्त्वेचा
र्याणां तथापि दाता पात्रापात्रविवेकेनैव ददातीत्याचा
र्याणामपि स्वमार्गीयफलदानं भविष्यतीत्याशंकानि
रासायाहुः महोदारचरित्रवानिति। यदि केवलं दातृत्व
मेव तदा पात्रापात्रविवेकेनैव दानमुचितं भवेत्। आ
चार्याणां तु दानं न केवलं किंत्वौदार्यसहितं केवलदान
स्यौदार्यविशिष्टदानस्य चैतावानविशेषः। केवलदा
ता तु देशकालविचारपूर्वकं फलोद्देशपूर्वकं पात्रापात्रवि २०
वेकपूर्वकं ददाति। उदारस्तु देशादिकमविचार्यैव स्वस्य

सहजौदार्यधर्मेणैव ददाति न तु पूर्वोक्तं किंचिद्विचार्यापिऽप्र
यत्नं तु साधारणौदार्यधर्म उक्तः। ऽप्राचार्याणां त्व लौकिकत्वे
नासाधारणत्वात्तदौदार्यस्याप्यसाधारणत्व ज्ञापनायो
क्तं महोदारचरित्रवानिति। औदार्येऽप्रलौकिकत्वेना
साधारणयमुक्तापि यन्महत्त्वमुक्तं तत्स्वमार्गीया
लौकिकफलदानौदार्यज्ञापनायोक्तं महोदारचरि
त्रवानिति। महोदारं यच्चरित्रं तद्वान् तद्युक्तः। ऽप्रतः
स्वप्रकटितभक्तिमार्गैकनिष्टजीवेष्वविचारेणैत
त्फलदानं न विरुध्यत इति सर्वमनवद्यं। महोदार
चरित्रवत्त्वकथनेनाचार्यस्वरूपं धर्मः स्वाभाविको
नागंतुक इत्यपि ज्ञापितं भवति। ननु पूर्वोक्तनाम नि
रूपितसामर्थ्यैवत्वं केवलं पुरुषोत्तम एव संभाव्यते न त

दतिरिक्तेऽप्याचार्याणां तु प्राकृतप्रपंचएव प्रादुर्भावात्तद्धर्मव
२१ त्वेन च प्रतीयमानत्वात्कथं पूर्वोक्तसर्वसामर्थ्यवत्वं
संभवतीत्येतदाशंकानिरासाय लौकिकप्रपंचप्राकट्ये
पि तद्धर्मवत्वप्रतीतावपि यथा पुरुषोत्तमत्वं सिध्यति त
त्सिद्धिप्रकारज्ञापनायाहुः ॥ प्राकृतानुकृतिव्याजमोहि
तासुरमानुष इति । प्राकृताः साधारणास्तेषां अनुकृतिर
नुकरणं तद्वदाचरणं सैव व्याजस्तेन मोहिताः आसुराः
असुरसृष्ट्या उत्पन्नाः मानुषाः मनुष्याः येन सः । नन्वीश्वर
रस्य प्राकृतानुकरणं दृष्ट्वा देवानामपि मोहः संभाव्यत इति
कथमासुरजीवानामेव मोहकत्वमिति चेत् । सत्यं । प्रा
कृतानुकरणजनितमोहो यत्र दृष्टस्तत्रासुरजीवानां ऽप्र २१
पवात् तद्धर्माविशिनां यथा कंसपूतनादीनां । तद्यथा । तांबी

ह्येतिश्लोकेऽलौकिकधर्मवत्त्वेन गर्भे पुरुषोत्तमास्थितिं ज्ञात्वापि पश्चा
त्तिग्रहादिकं यत्कृतवान् तत्प्राकृतवज्जन्मादिज्ञाननिमित्तकमेव । प्र
गोपि श्रीगोकुले प्रभुप्राकट्यज्ञानानन्तरमपि पूतनादिप्रेषणं । पूतनादीना
मपि यन्निःशंकं भगवद्द्रोहे प्रवृत्तिः सापि बालं प्रतिच्छन्ननिजोरुतेज
समित्ययनेनालौकिकधर्माच्छादनपूर्वकं केवलं प्राकृतबालकतुल्य
धर्मानुकरणादर्शननिमित्तकैव । शुद्धदैवजीवानां ब्रह्मादीनांलौकि
कानुकरणातुल्यधर्मस्थितिज्ञानवत्त्वेपि पुरुषोत्तमत्वेन स्वपक्ष
पातित्वेन च स्तुत्यप एव जाताः न तु प्राकृतधर्मानुकृतिदर्शनेनाना
न्यथाबुद्धिर्जातेत्येतावत्सर्वं । यथा भगवति दृष्टं तद्वदत्रापि प्राचा
र्यस्वरूपज्ञानवतां भक्तानां स्वोद्धारकज्ञानवत्त्वेन लौकिकानुकरणा
दर्शनेपि पुरुषोत्तमत्वप्रतीतिरेव न त्वासुरजीववदन्यथाप्रतीतिर
पि दृश्यत इत्येतावत्सर्वं धर्मतुल्यत्वज्ञापनायोक्तं प्राकृतानुकृति

व्याजमोहितासुरमानुषइति। यद्यप्येवं लौकिकानुकृतित्वेपि सोपपत्तिक
२२ पुरुषोत्तम एवं निरूपितं तथाप्याचार्यैः शुद्धफलरूपपुष्टिमार्गप्रव
र्त्तकत्वं तस्य च श्रुतिस्मृत्याद्यनेकप्रमाणैः सर्वाधिकत्वाज्ञापनं स्व
प्रवर्त्तितभक्तिमार्गांगीकृतजीवेषु तन्मार्गबोधनेन कृतार्थीकरणमित्या
स्वरूपं दिकं पुरुषोत्तमस्वरूपेप्यप्रतीतं प्रतीयते तत्र को हेतुरित्याशंक्य
तत्प्रतीतौ पुरुषोत्तममुख्यावयवरूपत्वमप्यस्तीति ज्ञापनाय तत
द्धेतुभूतं नामाहुः। वैश्वानर इति। वैश्वानरपदादग्निर्मुखमि
ति श्रुत्या पुरुषोत्तममुखरूपत्वमग्नेरुक्तं तेन तन्मुखरूपाग्नेरा
धिदैविकत्वमानन्दरूपत्वं। मुखे वागप्यस्तीति वाग्रूपत्वं च। आ
चार्याणां पुरुषोत्तमवाग्रूपत्वेन शुद्धपुष्टिमार्गप्रवर्त्तकत्वे यदप्र
नुपपत्तयऽप्राशंकितास्ताः सर्वाः परिहृता वेदितव्याः। अधिकं तत्रा २२
नुप्रविष्टं न तु तद्धानिरिति न्यायेन नानुपपत्तिः काचित् ननु वैश्वान

नरत्वेन पुरुषोत्तममुखारविन्दसंबन्ध्यलौकिकाग्निरूपत्वेनास
ह्यतेजोरूपत्वादुक्तानां सेवने बाधकत्वात्सेवा न सिद्ध्येदित्याशंक्य तेजो
रूपत्वेऽपि सेवासिद्धौ बाधकत्वाभावादाहुः । वल्लभाख्य इति । वल्ल
भ इत्याख्या नाम यस्य सः वल्लभाख्यः । पूर्वं नाम्ना वैश्वानरत्वमुक्त्वा
ऽग्निमनाम्निपद्वल्लभाख्यत्वमुक्तं तस्यायमाशयः । यथा शीतकाले
स्वभावतोप्यग्निः सर्वस्यापि शीतनिवारकत्वेन प्रियो भवति न तु तदति
रिक्तकालेष्वपि तद्वदाचार्यसेवकानामप्याचार्येषु सदाऽप्रलौकि
कतेजः प्रागट्येन लौकिकाग्निसेवनमिव कदाचित्सुखदत्वं कदाचि
न्नेति शंका भवेदिति तच्छंकानिराकरणायाप्युक्तं वल्लभाख्य इति तस्या
यमाशयः । लौकिकोऽग्निः प्राकृत इति तत्तेजसि तारतम्याद्ल्पत्वबहु
त्वाभ्यां कदाचित्प्रियः कदाचिन्नेतीयं व्यवस्था तत्र सार्वदिकी । ऽप्राचार्या
णां तु पुरुषोत्तमास्यत्वेन तत्तेजसोऽप्यानन्दरूपत्वेन सर्वदाऽतिप्रिय

२२ त्वमेव न तु कदाचित्प्रियत्वे तारतम्यम् प्रीतिज्ञापनायाप्युक्तं वल्लभाख्य इति।
ननु लोके सदा प्रियेऽपि पदार्थे केनचिन्निमित्तेन कदाचिदप्रियत्वमपि भास
ते। तथा प्रकृतेऽपि कदाचिन्निमित्तवशात्तथात्वं भविष्यतीत्याशंकानिरासा
याहुः। सद्रूप इति। अस्यायमर्थः। वस्तुविचारे क्रियमाणे स्वतः सुखमेव
प्रियं न त्वन्यत्। अन्येषां यत्प्रियत्वं तत्सुखहेतुत्वेन न तु सुखस्वरू
रूपत्वेन लौकिकपदार्थानां प्रकृतिसंबंधात्स्वतः सुखरूपत्वाभा
वात्समयविशेषे सुखहेतुत्वमेव तेषां न तु सुखात्मकत्वेन सर्वदा
प्रियत्वमेव। आचार्याणां तत्पुरुषोत्तमास्यत्वेनानन्दरूपत्वात्स्व
भावतस्तस्यैव प्रियत्वान्न लौकिकपदार्थवत्प्रियहेतुत्वं सम्भवती
त्याशंकानिरासायोक्तं सद्रूप इति। सद्रूपत्वेन केवलं सत्तामात्रं न
विवक्षितं किंतूपलक्षणत्वेन सच्चिदानन्दरूपत्वमुक्तं भवतीति ना
त्र लौकिकपूर्वपक्षावसरोऽपि संभवतीत्येतत्सर्वं हृदि कृत्वाहुः सद्रूप २३

इति। ननु पूर्वनाम्नि सद्रूपत्वोक्त्या सच्चिदानन्दरूपत्वेन निरूप्यानन्दरू
पत्वेन सर्वदा प्रियत्वं प्रतिपादितं भक्तानां तथापि प्रिये स्वस्वभावानु
सारेण मनोरथोत्पत्तेरावश्यकत्वात्तत्पूर्त्यभावजनितखेदेन तदंशे
प्रियत्वांशस्यापि तिरोभावः संभवेदित्याशंकानिरासायाहुः॥ हित
कृत्सतामिति। सतां भक्तानां तत्तद्भावभेदेन तत्तन्मनोरथपूर्त्यादिशी
घ्रमेव संपादयति न तु तत्संपादने विलंबमपि सहत इति ज्ञापनायो
क्तं हितकृत्सतामिति एतेन सर्वदानिप्रियत्वानुपपत्तिपूर्वपक्षो निरस्तः।
यद्यपि स्वभक्तेषु पूर्वोक्तैः स्वनामभिः स्वस्वरूपं ज्ञापितं स्वमार्गीयफ
लं च स्वमार्गे भगवद्भजनप्रकारस्तेषु न ज्ञापितः स तु न वचनमात्रैकग
म्य इति तेषां भजनप्रकारशिक्षार्थं स्वयं भजनं करोतीत्येतज्ज्ञापनायाहुः।
जनसिक्षाकृते कृष्णभक्तिकृदिति। जनाः सेवकास्तेषां शिक्षासिद्ध
र्थं तत्कृते तन्निमित्तं कृष्णस्य सदानन्दस्य फलरूपस्य भक्तिभजनं त

२४ त्कृत् तत्कर्तृत्वेत्यर्थः। ननु भगवद्भजनप्रकाराः पुराणागमसिद्धाः सन्त्ये
व तद्द्वारा स्वीयेषु शिक्षणासिद्धावपि यत्तच्छिक्षार्थं स्वस्य भजनकर्तृत्व
मुक्तं तत्रायमाशयः। यद्यपि पुराणागमादिषु भजनप्रकाराः संति
[पूजामार्गीयत] यद्यपि न ते भक्तिमार्गीयत्वेन न पुरुषोत्तमपर्यवसायिनः किन्तु [पं. २]
तद्विभूतिपर्यवसायिनः तत्प्रतिपाद्यगोपालादिमन्त्रदेवतायाः
मन्त्राधीनत्वात् पुरुषोत्तमस्य न रोचयति मामित्यादिवचनैः स्वाधीन
धीनत्वोक्तिपूर्वकं केवलं भक्त्यधीनत्वनिरूपणेन स्पष्टमेव वैलक्ष
ण्यमिति न तदुक्तप्रकारस्य भक्तिमार्गीयत्वमित्येतद्बोधनार्थमुक्तं
कृष्णभक्तिकृदिति। यदि स्वकीयानां स्वमार्गीयभजनप्रकारं स्वयं
कृत्वा न शिक्षयेत्तदा स्वमार्गीयभजनप्रकाराज्ञानात्स्वीयानामपि
प्रकारांतरभजनकरणेन तत्कृतभजनस्य भक्तिमार्गीयत्वमेव न
स्यादित्यत उक्तं जनशिक्षाकृते कृष्णभक्तिकृदिति। स्वकरणेत्वा २४

स्वमार्गे भगवद्भजनस्यैव पुरुषार्थत्वं नान्यस्यापीति ज्ञापनाया
प्युक्तं जनसिक्षाकृते कृष्णभक्तकृदिति । एतेन पूजामार्गे पूज्य
देवतायाः पुरुषोत्तमविभूतित्वेन भक्तिमार्गे भजनीयस्य पुरुषो
त्तमत्वेन पूजाभक्तिमार्गयोरपि फलतारतम्यमप्युक्तं भवती
ति नातः परमधिकं वाच्यमिति सर्वमवदातं । कृष्णपदस्य फ
लवाचकत्वेनैतन्मार्गीयभजनस्य फलरूपत्वमेव न तु मार्गां
तरीय भजनवत्साधनतापीति ज्ञापितं । यद्यपि भक्तिपदस्य स्ने
हवाचकत्वेपि यद्भजनपरत्वमुक्तं तत्स्नेहस्य कृतिसाध्यत्वाभा
वादत्र च भक्तेः कृतिसाध्यत्वोक्त्या भक्तिपदं भजनपरमेव न स्नेह
परमिति ज्ञापनायोक्तं भक्तिकृदिति । ननु स्वीयानां स्वमार्गीयभज
नसिक्षार्थं स्वस्यैवैतावत्करणस्य किं प्रयोजनमित्याशंकां निरा
सायाहुः निखिलेष्टदः इति । निखिलं यत्स्वमार्गीयमिष्टं भगव

त्स्वरूपसंबंधिवांछितं तद्दीतीति निखिलेष्टद:। यदि स्वयमेतावत्कु
२५ त्वा स्वीयानां स्वमार्गीयभजनं न शिक्षयेत्तर्हि स्वमार्गभजनमेव मु
ख्यमिति स्वीयानां तदज्ञानान्निखिलेष्टदत्वमेव न स्यादतउ
क्तं निखिलेष्टद इति। एवं पूर्वनाम्नि निखिलेष्टदत्वमुक्त्वापि यत्स
र्वलक्षणसम्पन्न इत्युक्तं तस्यायमर्थ:। भक्तिमार्गीयभजनशिक्ष
णेन यन्निखिलेष्टदत्वमुक्तं। तावतैव भक्तिमार्गीयसर्वेष्टदा
तृत्वं न सिद्धं किन्तु भक्तिमार्गस्यानेकविधान्येव लक्षणा
नि सन्ति। भावभेदकृतानि तद्दातृत्वव्यतिरेकेण न सर्वेष्टदा
तृत्वं संभवतीति तद्दातृत्वं तल्लक्षणसम्पत्तिव्यतिरेकेण न सम्भ
वतीति तद्दातृत्वसामर्थ्यज्ञापनार्थमुक्तं सर्वलक्षणसम्पन्न इ
ति। तद्दातृत्वमेव प्रकटयन्ति। श्रीकृष्णज्ञानद इति। श्रीकृष्ण २५
पदेन रसात्मक भक्ति सा हि त्योक्त्या भक्तिमार्गीयफलात्मक

त्वमुक्तं तस्य यद्ज्ञानं तद्ददातीति श्रीकृष्णज्ञानदः ननु भगव
त्त्वमुक्तं ज्ञानोत्पत्तिप्रकाराः गीताभागवतादावुक्ता एवेति
तैरेव ज्ञानसिद्धौ किमतद्ज्ञानदानेनेति चेत्। सत्यं। यद्यपि
तत्र ज्ञानप्रकारा उक्तास्तथापि क्वचित्सर्वात्मकत्वेन क्वचि
ज्जगज्ज्ञापकत्वेन क्वचित्केवलज्ञानात्मकत्वेन न तु रसो
वै सः इति श्रुतिप्रतिपाद्यरसात्मकत्वेनापि निरूपिताः। तेषां
मर्यादामार्गीयत्वादौ चापि प्रकटितभक्तिमार्गांगीकृता
नां तेन मनोरमा इति स्वमार्गीयज्ञानविषयस्य तद्वैलक्ष
ण्यज्ञापनार्थं श्रीकृष्णज्ञानद इत्युक्तं। यद्यपि शुककपि
लनारदादीनां ज्ञानदातृत्वमस्ति तथापि तेषां मर्यादा
मार्गीयत्वात्तद्ज्ञानस्यापि तन्मार्गीयत्वमेव न त्वा
चार्याणामिव शुद्धपुष्टिमार्गीयज्ञानदातृत्वमपीति ज्ञाप

२६ नायोक्तं श्रीकृष्णानन्द इति। पूर्वं श्रीकृष्णानन्द इति यदुक्तं त
द्धेतुभूतं नामाहुः। गुरुरिति। यो यन्मार्गोपदेष्टा यन्मार्गीयफल
दाता च स तस्मिन्मार्गे गुरुर्भवति ॥ यथा कपिलादयः। तथा शु
द्धपुष्टिमार्गोपदेष्टृत्वं तन्मार्गीयफलदातृत्वं च आचार्याणामे
व नान्येषामपीति ज्ञापनायोक्तं गुरुरिति। ननु यद्यपि कपिलस्य
मातरं प्रति योगमार्गोपदेष्टृत्वं वर्तते तथापि भक्तियोगो बहुविध
इति वचनात्केवलमर्यादामार्गीयभक्तियोगोपदेष्टृत्वमपि श्रूयते ऽप्रा
चार्याणां तु प्रसंगादपि शुद्धपुष्टिमार्गातिरिक्तभक्तिमार्गानिरूपणे को
हेतुरिति चेत्तत्राहुः। स्वानन्दतुंदिल इति स्वस्य यो ऽप्रानन्दः तेनैव तुंदिलः ऽप्र
ति पुष्ट इत्यर्थः ऽप्रानन्दस्य स्वपदोपादानेनागणितः मनोरथांतो यः ऽप्रानं
दः तेनैवात्यंतपुष्टत्वनिरूपणेन तदतिरिक्तस्य सर्वस्याप्यतितुच्छत्वे
स्य च सर्वविस्मारकत्वेनेतरानुसंधानाभावोऽप्रसङ्गादपि नान्यभक्ति २६

मार्गेनैरूपकत्वमिति ज्ञापनायोक्तं स्वानंदतुंदिल इति। एवं पूर्वेनामो
क्तानन्दपुष्टत्वज्ञापनायाग्रिमं नामाहुः। पद्मदलायतविलोचन
इति। पद्मदलवदायते विशाले लोचने यस्य सः। अत्र लोचनयोः
पद्मदलसादृश्यनिरूपणेन शैत्यं सुखदत्वं सौगन्ध्यमारक्तरेखा
वत्त्वं च ज्ञापितं तेन भक्तानां तल्लोचनदर्शनमत्यंतं सुखदमिति ज्ञा
पितं। यद्यपि पद्मदलदृष्टांतनिरूपणेन सूचिता धर्माः लोचनयोः
सहजास्तथापि वीत्युपसर्गोपादानात्पूर्वोक्तानन्दवैशिष्ट्यम
पि ज्ञापितं एवमन्यापि विलोचनस्वरूपं निरूप्य स्वीयभक्तेषु त
त्कार्यमाहुः कृपादृग्वृष्टिसंहृष्टदासदासीप्रिय इति कृपायुक्ता
यादृशः कृपाकटाक्षास्तासां या वृष्टिर्निरंतरं वर्षणानि सर्वतः
प्लावनं ताभिः संहृष्टाः अत्यंतमानंदिताः दासा दास्यश्च ते षां प्रियः।
वृष्टिजनितहर्षे सम्यक्त्व कथनात्तदृष्टिजनितार्द्रतायास्तदीये

२७ षुनकदाचिदपगमइतिज्ञापितं।।अथवा कृपादृग्वृष्टिसंहृष्टदास
दास्यः प्रिया यस्य स तथा। यद्यपि दासदासीप्रियत्वकथनेनै
व पतित्वं प्राप्तं तथापि पुनः पतिस्त्वकथनस्यायमाशयः। यद्यपि
पतित्वं लोकेपि दृश्यते तथापि तत्र पतित्वलक्षणाभावात्पतित्व
मौपचारिकमेव न स्वाभाविकं।।आचार्येषु सर्वेपति स्यादकुतोभ
यस्वयं समंततः पतिभयातुरंजनमिति पतित्वलक्षणमत्रैवास्ति
स्वस्य कालादिभयराहित्येन स्वशरणगतानां कालादिभय
निवारकत्वेन पूर्णं पतित्वलक्षणमत्रैवास्ति नान्येष्वपीति-
ज्ञापनायोक्तं पतिरिति। ननु पतित्वेन स्वीयानां कालादिभ
यनिवर्तकत्वमस्तु तथापि लोकोत्पन्नासुरजीवानां स्वप्रति
पक्षत्वेन तद्दुःखकारित्वं भविष्यतीत्याशंक्यातद्दुःखनिवार २७
कत्वसामर्थ्यमप्यत्रास्तीति ज्ञापनायाहुः। रोषदृक्पात संप्लु

ष्ट भक्तद्विडिति। रोषसहितया दृक्कटाक्षः तस्याः पातस्तेन सम्यक्प्र
कारेण प्लुष्टाः दग्धाः भक्तद्विषो येन सः। दाहे सम्यक्त्वोक्त्या दग्धा
नां पुनरुत्पत्त्यभावः सूचितः। अत्र भक्तद्विषामेव दाहकथनेनो
दासीनेषु रोषदृक्पाताभावाद्दाहाभावः सूचितः। यद्यपि भक्तसेवित
त्वं सदास्त्येव तथापि भक्तसेवितत्वकथनेन पूर्वोक्तनामप्रकटित
सामर्थ्यदर्शनेन लौकिकस्वानिष्टनिवर्तकत्वज्ञानजनितानन्द
विशेषभरेण क्षणमात्रमपि सेवावियोगासहिष्णुतया भक्ता
नां सेवाकरणत्वज्ञापनायोक्तं भक्तसेवित इति। ननु भक्तानां बाहु
ल्यादनेकविधभाववत्त्वेन सर्वेषां सर्वभावपूर्त्तिसंपादकत्वेन
सेवनं न भविष्यतीति शंकानिरासायाहुः। सुखसेव्य इति। सुखेनै
व सेव्य इत्यर्थः। अयमाशयः। यद्यपि भक्तबाहुल्यमस्ति तथापि
यो यद्भावापत्त्या यथा सेवां कर्तुमिच्छति ~~तस्य~~ तद्भावपूर्त्ति प्रकारे

२८ तैव सुखसम्पादकत्वेमैव सेवामंगीकरोतीति ज्ञापनायोक्तं सुख
सेव्य इति। ननु भक्तानां सुखसेव्यत्वं दृष्टमन्येषामपि सुखसे
व्यत्वं इति। ननु भक्तानां सुखसेव्यत्वं दृष्टमन्येषामपि सुख
सेव्यत्वं भविष्यतीत्याशंकापरिहारायाहुः। दुराराध्य इति। भक्ता
भिरक्तानामतिकष्टेन कदाचित्संतोषमात्रजनकत्वं सम्भव
तीम तु सेवाकरणमपीति ज्ञापनायोक्तं दुराराध्य इति। ननु पूर्वं भ
क्तानामेव सुखसेव्यत्वमुक्तमन्येषां कष्टेनापि सन्तोषमा
त्र कथने को हेतुरित्याशंकानिरासायाहुः। दुर्लभांघ्रिसरोरु
ह इति। अत्र भक्तानामंघ्रिसरोरुहयोः कष्टेन प्राप्यत्वकथनेनत
त्कष्टस्यालौकिकमुक्तं भवति। अंघ्रिसरोरुहयोरलौकिकत्वेन लौकि
ककष्टप्राप्यसम्भवात्। तेन दुर्लभांघ्रिसरोरुहत्वकथनेन दुः २८
खेन चरणारविन्दप्राप्त्यानिरूपणे प्राप्ये चरणसरोरुहे यस्य

सः। यत्र भक्तानामपीयं व्यवस्था तत्रान्येषां तत्संबंधः सुतरां दूरापा
स्त इति नाधिकं वक्तव्यमिति सर्वमनवद्यं। एवं पूर्वेनामार्थे निरू
पणेन भक्तातिरिक्तानां संबंधाभावमुपपाद्य संबंधाभावे पुनर्हे
त्वंतरमप्याहुः। उग्रप्रताप इति। उग्रः भक्तातिरिक्तानामस
ह्यः प्रतापस्तेजो यस्य सः तेनान्येषां नैकट्यमपि दुर्लभं कुतः
संबन्धोपीत्यर्थः। ननु यद्यपि भक्तातिरिक्तेषु तेजसः प्रस
ह्यत्वमुक्तं तथापि तेजस्वभावात्कदाचिद्भक्तेष्वप्यस
ह्यत्वं भविष्यतीत्याशंका निरासाग्रिमं नामाहुः। वाक्सी
धु पूरिताशेषसेवक इति। वाक्सीधुना वचनामृतेन वा
ह्याभ्यंतरभेदेन पूरिताः प्रशेषाः सर्वे सेवका येन सः।
वचनानां पीयूषत्वोक्त्या सर्वेंद्रियसुखजनकत्वं सर्वता
पनिवर्त्तकत्वं च ज्ञापितमिति भक्तानां पूर्वोक्ततेजो स

२८ स्यत्वशंकानिरासायोक्तं वाक्सीधुपूरिताशेषसेवक
इति। एवं सेवकेषु वचनामृतपूरणेन सर्वतापनिवृत्ति
मुक्त्वा श्रीभागवतादिनिरूपकवचनामृतैरपि सेवका
नां सर्वतापनिवारकत्वज्ञापनायाहुः। श्रीभागवतपी
यूषसमुद्रमथनक्षम इति। श्रीभागवतरूपो यः पीयूष
समुद्रः अमृतसमुद्रस्तस्य मथने तत्सारोद्धाराय मा
लोडने क्षमः समर्थ इत्यर्थः। तेन सेवकानां श्रीभागव
तादिज्ञानजनिततापोऽपि तदर्थप्रतिपादकसुबोधि
न्यादिरूपवचनामृतैरपि निवार्यत इति ज्ञापनायो
क्तं श्रीभागवतपीयूषसमुद्रमथनक्षम इति। पूर्व
नाम्नि श्रीभागवतस्यामृतसमुद्रत्वमुपपाद्याचार्याणां २८
तन्मथनकर्तृत्वमुपपाद्यानेन नाम्नि तत्सारोद्धारकर्तृ

त्वज्ञापनायाग्रिमं नामाहुः। तत्सारभूतरासस्त्रीभावपूरितविग्रह
इति। ऽत्र पूरितविग्रहत्वोक्तेरयमाशयः। यथा क्षीरसमुद्र
मथने क्षीरस्यामृतापेक्षयान्यूनत्वादमृतस्यैव सारभूतत्वमुचि
तं। ऽत्र समुद्रस्यैवामृतमयत्वाल्लोकेततउत्कृष्ट पदार्थस्याभा
वादेतद्भावातिरिक्तस्य कस्यापि सारत्वं न संभवतीति मुक्त्यपेक्ष
याप्यधिकस्य रासस्त्रीभावस्य सारत्वमुक्तं। यथा क्षीरसमुद्रो
द्भूतसारस्य भोक्तारो देवा एव नान्ये। तथैवैतदुद्भूतस्यारस्य
भोक्तृत्वमाचार्याणामेव नान्यस्यापीति ज्ञापनायोक्तं। तत्सा
रभूतरासस्त्रीभावपूरितविग्रह इति॥ ऽत्र विग्रहस्य भावपूरित
त्वकथनेन यथा देवानामांतरे वामृतपूर्त्तिर्न बाह्यतः तथान
प्रकृते ऽप्राचार्याणां तु बाह्याभ्यंतरभेदेनैतद्भावपूरितत्वमे
व नान्यभावसंबंधगंधोपीति ज्ञापनायोक्तं तत्सारभूतरा

स्त्रीभावस्य सारत्वमुक्तं। यथा क्षीरसमुद्रोद्भूतसारस्य भो
३० क्तारो देवा एव नान्ये। तथैवैतदुद्भूतस्यारस्य भोक्तृत्वमा
चार्याणामेव नान्यस्यापीति ज्ञापनायोक्तं पुरिति विग्र
ह इति। नन्वाचार्याणां विग्रहस्य वा ह्याभ्यंतरभेदेन क
थमेतद्भावपूर्णत्वमेवत्याशंकानिरासायाहुः। सन्निध्य
मात्रदत्तश्रीकृष्णप्रेमेति। सान्निध्यमात्रेणैव दत्तं श्रीकृ
ष्णप्रेम येन सः। यदि वा ह्याभ्यंतरभेदेनैतद्रसपूर्णत्वं तस्या
न्तदा भक्तानां स्वसांनिध्यमात्रेणैव श्रीकृष्णप्रेमदानसाम
र्थ्यं न स्यात्। यो येन पदार्थेन पूर्णः स एव तं दातुं शक्नोति।
न त्वपूर्णोऽपि प्रेमदाने श्रीकृष्णपदीपादानात् भक्तसहित
लीलाविशिष्टे फलात्मके प्रेमदानं सूचितं। ननु श्रीकृष्ण
एव प्रेमदाने को हेतुरित्याशंकानिरासाय तद्धेतुभूतनामा ३०

हुः विमुक्तिद इति। विशिष्टां पुष्टिमार्गीयां साक्षाद्भगवत्संबंधरू
पां मुक्तिं ददातीति विमुक्तिदः। पुष्टिमार्गे भगवत्संबंधस्य मु
क्तित्वकथनस्यायमभिप्रायः। यथा मर्यादामार्गे सायुज्या
दिमुक्तिरेव फलत्वं। तथास्मिन्मार्गे भगवत्संबंधस्यैव फलत्वं
न सायुज्यादिरिति ज्ञापनाय मुक्तित्वकथनं यथा मुक्तानां पु
नरन्यावस्थाभावः तथैव पुष्टिमार्गीय फलप्राप्तानामपि
न पुनरवस्थांतराभावज्ञापनायेमपि मुक्तित्वकथनं। एवं स्व
मार्गीयफलस्य सर्वमार्गीयफलाधिक्यं तस्य च सर्वप्रमाण
सिद्धत्वज्ञापनायाग्रिमनामाहुः। रासलीलैकतात्पर्य इ
ति। रासलीलायामेवैकं केवलं तात्पर्यं यस्य सः एतेन साक्षा
त्स्वरूपसंबंधस्यैव सर्वाधिकफलत्वं ज्ञापितं। यदि मुक्तेरे
वैतदपेक्षयाऽधिकफलत्वं भवेत्तदा भगवान्नेतन्मार्गीयफला

३१ नुभवं कारयित्वा पश्चान्मुक्तिं दद्यात् यन्मुक्तिं दत्वा तदानंदानुभवं का
रयित्वैतन्मार्गीयं फलं दत्तवान्। तस्मादेतस्यैव मुख्यफलत्वं नान्य
स्य यस्मादेतत्फलनिरूपणादेवास्य फलप्रकरणत्वं न तु प्रकारांत
रेणान्येतत्सर्वं हृदि कृत्वाऽऽचार्यैरितस्यैव फलत्वं निरूपितं नान्
यस्येति ज्ञापनायोक्तं रासलीलैकतात्पर्य इति। एवं पूर्वोक्त फल
स्यैव सर्वाधिक फलत्वमुपपाद्य प्रकारांतरेणापि फलत्व प्रति
पादक त्वे हेतुभूतं नामांतरमाहुः। कृपयैतत्कथाप्रद इति। कृपयै
तत्कथा रासलीला संबंधिनीतां प्रकर्षेण ददातीति तदर्थानु
भवं कारयतीत्यर्थः। यद्यपि कथायाः शब्दात्मकत्वात्तस्याः
कथनमेव दानं तथापि तद्दाने प्रकर्षत्व कथनात्तत्र च कृपायाए
व हेतुत्व कथनाद्यत्रैतेन कृपाव्यतिरेकेण कथनं तत्र कथनमे ३२
व दानं। यत्र कृपापूर्वकं कथनं तत्रैव दानंदाने प्रशब्दो

पादानात्तद्धीनुभवो त्वं ज्ञाप्यते इत्यत आहुः। कृपयैतत्कथा प्रद
दाति। यद्यपि रासलीला प्रदत्व कथनेनैव तत्प्रतिपादित संयोग
विप्रयोगरसानुभवस्य श्रीनृसां तदीयानां तद्रसभावनयार
सानुभवः सिध्यति तथापि केवलो विप्रयोगभावः भावांतररहि
तः स्वतंत्रतया तत्तदवस्थाः विकलत्वमस्वास्थ्यमूर्छा पुनर्जोग
रणां तदात्म्येन यत्किंचित्स्वास्थ्यं प्रलापाद्यवस्थाभेदेनानुभव
सिध्यर्थं कथनत्वज्ञापनायोक्तं विरहानुभवैकार्थं सर्वत्यागो
पदेशक इति। विरहानुभवस्वरकः केवलः अस्य: प्रयोजनं
तन्निमित्तकोयः सर्वत्यागस्तदुपदेशकर्ते त्यर्थः। यद्यपि रासली
लायामपि विप्रयोगभावोस्त्येव: तथापि तत्र कस्याश्चि
त्सूतनायं त्यादि इति लीलाभिनिवेशभावकथना तृतीयाध्या
ये पाद्य श्लोके ऽनैतचित्तप्रतिपादिना द्वितीयादि श्लोकेषु पा

त्वंभप्राधान्यादिभावनिरूपणान्ते केवलत्वेनोपदेशकर्तृत्वकथ
३२ नेन तदुपदेशप्रकारस्थितौ एतद्भावो भवतीत्यपि ज्ञापनायो
पदेशक इत्युक्तं एवं विरहानुभवहेतुत्यागोपदेशकर्तृत्वमु
क्त्वा भक्तिमार्गस्यैवोपयोगि भक्त्याचारोपदेशकर्तृत्वमाहुः । भ
क्त्याचारोपदिष्टा चेति भक्तिमार्गीयो यः आचारः आचरणम
न्याश्रयराहित्येन निरुपधिभावेन फलत्वज्ञानपूर्वकं से
वाकरणं तदुपदेशकर्तृत्वर्थः । स्वस्यापि तथा कर्तृत्वज्ञाप
नाय च कारः । एवं भक्त्याचारोपदेशकर्तृत्वमुक्त्वाऽग्नि
कर्ममार्गप्रवर्त्तकत्वकथनस्यायमाशयः । यदि केवलं भक्ति
भक्तिमार्गोपदेशमेव कृत्वा स्वीयेषु वर्णाश्रमाचारधर्मा
न्न प्रवर्त्त । यत् तदा बहिर्मुखानां स्वप्रवर्त्तितभक्तिमार्गे दो
षारोपात्स्वमार्गस्यापि दोषारोपहेतुत्वमापद्यतेति निर्दो ३२

त्वज्ञापनार्थमाहुः । कर्ममार्गप्रवर्त्तक इति । एवं कर्ममार्गप्रव
र्त्तकत्वे हेतुमुक्त्वा स्वस्यापि यागकरणं स्वीयानां भक्तिमा
र्गापराधाभावशिक्षार्थमेव नान्यार्थमिति ज्ञापनायोक्तं । यागादौ
भक्तिमार्गैकसाधनत्वोपदेशक इति । यागादौ यागः आदिर्यस्य
दानादिः स यागादिस्तस्मिन्यागादौ भक्तिमार्गस्य एकं मुख्यं यत्सा
धनत्वं तदुपदेशकः । ननु स्वस्य यागकरणेन कथं भक्तिमार्गाप
राधनिवृत्तिरिति चेत् उच्यते । भक्तिमार्गे अपराधद्वयं देवतांतर
संबंधः भक्तिमार्गीयफलाभावश्च । आचार्यैः स्वयं यागकरणे
न स्वीयानामपराधद्वयं निवारितं यतः देवतायागः भगवद्विभू
तित्वेनैव कृतः न तु स्वतंत्रदेवतात्वेन । अत एव देवतानां स्वातं
त्र्याभावपूर्वकं भगवद्विभूतित्वेन यजनं युधिष्ठिरे सौवप्रभुं प्र
ति विज्ञापितं यज्ञैर्विभूतीर्भवत इति । नात्र विचारणीयं किं

चित्। तस्यापि फलत्वेन भक्तिरेवोद्देश्या: कुत: ननु स्वर्गादेरपीत्ये
३३ तावतोशिष्टात्तदीयैस्तद्यागकरणेनैव ज्ञाता नान्यथेति ज्ञापनोक्तं
यागादौ भक्तिमार्गैकसाधनत्वोपदेशक इति। यद्यपि स्वीयसि
क्षार्थमेव यागकरणं तथापि यागस्य स्वर्गफलकत्वेन श्रुतिप्रति
पादनादाचार्याणामपि स्वर्गसुखाकांक्षा कामितफलाकांक्षा
वा भविष्यतीति कस्यचिद्बहिर्मुखस्याशंकानिरासायाग्रिमनाम
द्वयमाहु:। पूर्णानंद: पूर्णानंद: पूर्णकाम इति। पूर्ण: प्रगणित आ
नंदो यस्य स:। तेनास्यैवानंदस्यान्यानि भूतानि मात्रामुपजी
वंतीति श्रुत्या स्वर्गादिलोकसुखस्यापि भगवदानंदलेशत्व
कथनादाचार्याणां भगवदानंदपूर्णत्वेन स्वर्गादिलोकसुखा
कांक्षासंभावनापि न संभवतीति क्व बहिर्मुखाशंकितसम्भा
वनापीति ज्ञापनायोक्तं पूर्णानन्द इति। द्वितीयाशंकापरिहाराय ३३

द्वितीयनामधेयमाहुः। पूर्णकाम इति। पूर्णाः लोककामिति सुखापे
क्षयाप्यगणितसुखपूर्णाःऽपरलौकिकाः कामा यस्य सः। अनेन
द्वितीयाकांक्षायाऽपि निरासश्चोक्त इति सर्वमनवद्यं। एवं पूर्वेना
म्नाचार्याणां पूर्णकामत्वमुक्त्वाऽतः परं यत्रान्येषामपि काम
पूरकत्वमस्ति तत्रास्वस्य पूर्णकामत्वे किं वक्तव्यमिति ज्ञाप
नायाग्रिमनामाहुः। वाक्पतिरिति। वाक्पतित्वकथनेनाचार्या
णां भगवन्मुखाधिष्ठानाग्निरूपत्वकथनेन यागहविर्भोक्तृत्व
मुक्तं भवति तेन यागकर्तॄणामपि हविर्भोक्तृत्वेन यत्र कामपूरक
त्वं तत्रास्वस्य पूर्णकामत्वे किं वाच्यमित्येतद्बोधनाय मुक्तं वा
क्पतिरिति। एवं कर्ममार्गीयाणां कामपूरकत्वमुपपाद्य भग
वद्धानमार्गीयाणामपि मनोरथपूरकत्वोपपादनायाग्रिमना
माहुः। विबुधेश्वर इति। विशेषेण बुधाः ज्ञानिनः ज्ञाने विशेषे भ

भक्तिमार्गीयत्वं तेषामीश्वरः फलदाता। एवं भक्तिमार्गीयज्ञानफलदा
३४ तृत्वमुक्त्वा तद्ज्ञानफलदानप्रकारज्ञापनायाग्रिमं नामाहुः। कृष्णा
नामेति। कृष्णस्य फलरूपस्य यन्नामसहस्रं तस्य वक्ता प्रकाश
कः। यद्यपि भगवत्सहस्रनामवक्तृत्वं वैशंपायनादिष्वपि वर्त्त
ते। तथापि तेषां पुराणान्तरप्रसिद्धनाम्नामेव वक्तृत्वं न तु फलात्मक
स्य तत्रापि श्रीभागवतोक्तदशलीलाविशिष्टस्य तत्र लीलाविशि
ष्टनामप्रतिपादकत्वमाचार्याणामिनान्येषामप्यस्तीति ज्ञाप
नायोक्तं कृष्णनामसहस्रस्य वक्तेति। अतः परं फलात्मकस्य
तत्रापि दशविधलीलाविशिष्टस्य नामकथनस्यावश्यकत्व
ज्ञापनायाग्रिमं नामाहुः। भक्तपरायण इति। भक्तेषु परायणः ता
त्पर्यवान्। यदि फलात्मकस्य दशविधलीलात्मकस्य दशवि ३४
धलीलाविशिष्टस्य नाम्नां प्राकट्यमाचार्यैर्न क्रियते तदा भक्ता

नां श्रीभागवताद्यर्थज्ञानाभावात्तत्प्रतिपादितफलं न सिद्ध्येदित्याचा
र्याणां भक्तपरायणत्वमपि न सिद्ध्येदित्येतदाशंकानिरासायोक्तं
भक्तपरायणा इति। एवं पूर्वोक्तप्रकारेण भक्तपरत्वं निरूप्य
स्वप्रकटितभक्तिमार्गीयाचारज्ञापकमग्रिमनामाहुः। भक्त्या
चारोपदेशार्थनानावाक्यनिरूपक इति। भक्तिमार्गीयो यः प्रा
चारः प्राचरणं तदुपदेशार्थं नानाविधानि यानि वाक्यानि नव
रत्नभक्तिवर्द्धिन्यादीनि तेषां निरूपकः तदर्थावबोधक इत्यर्थः।
यद्यपि पूर्वं भक्त्याचारोपदेष्टृत्वमात्रमुक्तं तथाप्यधुना तद्बोधा
र्थमेव वाक्यनिरूपणपूर्वकमुच्यत इति न पौनरुक्त्यदोषः।
एवं स्ववाक्योपदेशार्थावगमजनितानंदभक्तकृतिज्ञापकं ना
माहुः। स्वार्थोज्झिताखिलप्राणप्रिय इति॥ स्वार्थमेवाचार्यसेवा
र्थमेवोज्झितमखिलं सेवाविरोधि यैस्तेषां प्राणादपि प्रियः प्र

धर्मैः स्वार्थं स्वकृतार्थितासिद्ध्यर्थमुज्झितमखिलं भक्तिमार्गवि
३५ रोधि यैस्तेषां प्राणप्रियः। एवं पूर्वनाम्नि भक्तानां प्राणप्रियत्व
मुक्त्वा प्राणप्रियत्वज्ञापककृत्या ज्ञापकं नामाहुः। तादृशचेष्टि
त इति। तादृशैः स्वार्थोज्झिताखिलैः वेष्टितः सेवार्थं ननु निरंत
रं सेवाकरणे सेवासत्त्वात् कदाचित्कर्मकाललोपदोषः प्रस
ज्येतेति तन्निराकरणायाहुः। स्वदासार्थकृताशेषसाधन इति।
स्वदासार्थमेव कृतान्यशेषाणि सर्वाणि साधनानि येन सः। ए
तेन कर्मकाललोपदोषपरिहारकत्वमुक्तं। अथवा। ननु यत्से
वार्थं तदोषाः सर्वं त्यक्त्वा तदाश्रिता एव तिष्ठंति तादृशमहानुभा
वानां मर्यादामार्गोक्तसाधनकरणे किं प्रयोजनमित्याशंकाया
राशयाप्युक्तं स्वदासेत्यादि। ननु स्वकृतसाधनेन व्यधिकरण
त्वात् कथं दासगतदोषनिवृत्तिरित्याशंकापरिहारायाग्निमंना ३५

माहुः। सर्वशक्तिधृगिति। सर्वाः ऽलौकिक्यः शक्तयस्तासु धृष्टो
ति प्रगल्भते स्वसामर्थ्यं प्राकट्यं करोतीति सर्वशक्तिधृक्। अत्र
शक्तिषु प्रागल्भ्यकथनेन स्वस्य साधनकरणे न भक्तानां क
दाचित्साधनलोपदोषपरिहारसामर्थ्यमुक्तमिति न पूर्वप
क्षावसर इति सर्वमनवद्यं। एवं भगवदाज्ञया भक्तिमार्गप्रा
कट्यार्थं स्वयं प्रकटीभूत्वा स्वं प्रकटितमार्गं स्वीयभक्तेषु स्वो
पदेशस्वाचरणादिना स्वप्राकट्यसमये तेषु सर्वं सम्यक्ज्ञा
पयित्वा ऽग्रेऽपि भगवता भक्तिमार्गाङ्गीकृतजीवेषु भक्ति
मार्गप्रवृत्तिः स्ववंशव्यतिरेकेण न भवतीति स्ववंशकरणा
मिति ज्ञापनायाग्रिमं नामाहुः। भुवि भक्तिप्रचारैककृते स्वा
न्वयकृदिति। भुवि भक्तिप्रचारैककृते स्वान्वयकृत् स्वान्वय
कृत् स्ववंशकर्ता ऽत्रान्वयपदस्य पुत्रपरत्वं ज्ञेयं। एकपदेन भु

३६ ख्यत्वं ज्ञापितं। वंशे प्रकारांतरनिराकरणपूर्वकं केवलमौरसत्व
ज्ञापनायोक्तं पितेति। ननु पितृत्वेपि स्वतुल्यत्वं यदि वंशेनस्या
त्तदा कथं स्वप्रवर्त्तितमार्गप्रवर्त्तकत्वं भवेदित्याशंका निरा
साया हुः। स्ववंशेस्यापिताशेषस्वमहात्म्य इति। स्ववंशे स्थापि
तं अशेषं संपूर्णं स्वस्य महात्म्यं येन सः। एतेन पूर्वकृताशंका
निरासो ज्ञापितः। ननु सर्वात्मना संपूर्णस्वमहात्म्यस्थापने प्रा
श्चर्यित्वमाशंक्यतं निरासायाहुः। स्मयापह इति। स्मयमाश्च
र्यं मपहंतीति दूरीकरोतीति स्मयापहः। ननु सिद्धवत्कारे
णास्मयापहत्वकथने को हेतुरित्याशंका निरासाय हेतुनि
रूपकं नामाहुः। पतिव्रतापतिरिति। पत्युः व्रतमिव निय
म इव व्रतं नियमो यस्याः सा पतिव्रता तस्याः पतिः अनेन आचार्ये ३६
षु यावंतो धर्माः अलौकिकास्तावद्धर्मवत्त्वमत्रापि ज्ञापितं भवति।

यदि तादृशमिव त्वं तासु न स्यात्तदाचार्याणाम समत्वेन तत्प्रति
त्वमेवनोपपद्येत । अत्रायमाशयः । वंशे यत्र तारतम्यं दृष्टं
तत्र बीजक्षेत्र तारतम्यहेतुकमेव नत्वन्यहेतुमिति । आचा
र्याणां साक्षात्पुरुषोत्तमास्यत्वं सोपपत्तिकं पूर्वं निरू
पितमेव तत्परिग्रहेपि यदि तत्तुल्यत्वं न स्यात्तदा बीज क्षे
त्र तारतम्याद्वंशेपि तारतम्यं तत्र तदुभयोः परमानंदरूपत्वे
न साम्यात्तत्प्रादुर्भूतवंशस्यापि तत्तुल्यत्वज्ञापनेन पू
र्वोक्ता शंका निरासउक्तो भवतीति सर्वमनवद्यं । अदृष्टस्य
जीवधर्मत्ववत्त्वकृता शंकासंभवोपि नेति सर्वं सुस्थं । एवं
स्ववंशस्य सोपपत्तिकं स्वसाम्यमुपपाद्य स्वीयानामैहिका
मुष्मिक फलदानसामर्थ्यमाहुः । पारलौकिकैहिकदानकृदि
ति । स्वमार्गीयं पारलौकिकं भगवत्संबंधरूपमैहिकं त

तत्सेवार्थमेव स्त्रीपुत्रधनादिरूपं तद्दानकृतं। यद्यप्यदृष्टादि
३१ नाकस्यचित् तीर्थादिमरणेन पारलौकिकं फलं ऽनुमीयते। पशु
पुत्रादिरूपमैहिकमपि दृश्यते तथापि पूर्वोक्तप्रकारकपार
लौकिकैहिकफलदाने ऽप्याचार्याणामेव सामर्थ्यं न त्वदृष्टादे
रपीति ज्ञापनायोक्तं पारलौकिकैहिकदानं कृदिति। य
द्यपि पूर्वनाम्नि पारलौकिकैहिकदानकरणेन संदेहस्तथा
पि कदा केन प्रकारेण दास्यतीति जिज्ञासायामाहुः। नि
गूढहृदय इति। नितरां गूढं ईश्वरत्वेन ज्ञातुमशक्यं हृदयं
यस्य सः तेन फलदानेन संदेहः परन्तु ईश्वरेच्छाया ऽप्रनिय
म्यत्वात् कालविशेषनियमस्याशक्यत्वम ज्ञापनायोक्तं नि
गूढहृदय इति। ननु सर्वेषामेयमेवव्यवस्था ऽप्रपत्ता स्वे
च्छामपि केषुचिद्दापयतीति संदेहनिवर्त्यर्थमग्रिमनामा ३१

हुः ऽनन्यभक्तेषु ज्ञापिताशय इति। अनन्याः अंतरंगभक्ताः प
द्मनाभदासप्रभृतयः विरलाः तेषु ज्ञापितः आशयः अंतःकर
णाभिप्रायो येन सः। तेनेयं ज्ञापयति स एव समयाविशेषं जानाति न
तु सर्वेषां ज्ञानयोग्यतेति ज्ञापनायोक्तमनन्यभक्तेषु ज्ञापिता
शय इति। एवं स्वकीयेषु फलव्यभिचारित्वमुपपाद्य क
दाचिदुःसंसर्गात्स्वकीयानामपि कृतिसाम्यादज्ञाना
दुपासनादिमार्गप्रवृत्तानामज्ञाननिवृत्तिपूर्वकं रक्षा
करणज्ञापकमग्रिमं नामाहुः। उपासनादिमार्गेति
मुग्धमोहनिवारक इति। उपासनादयो मार्गाः पूजा
ज्ञानयोगादयस्तत्र भक्तिमार्गाभिमानेन येऽतिमुग्धाः
अत्यंताज्ञानिनस्तेषां भक्तिनिरूपणेनाज्ञाननिवारकः।।
ननु भक्तिमार्गनिरूपणमात्रेणैव कथमज्ञाननिवृत्ति

रित्याशंकानिरासायाग्निमनां माहुः। भक्तिमार्गे सर्वमार्गवै
३८ लक्षण्यानुभूतिकृदिति। अत्र निरूपणेन कथनमात्रं न विव
क्षितं किंतु कथनस्यानुभवपर्यवसायित्वेनाज्ञाननिवर्त्त
कत्वज्ञापनायोक्तं। भक्तिमार्गे सर्वमार्गवैलक्षण्यनुभू
तिन्तदिति। वैलक्षण्यं तूपासनामार्गोपास्यदेवताया
मंत्राधीनत्वादिभूतित्वेन साक्षात् पुरुषोत्तमत्वाभावा
द्भक्तिमार्गे सेव्यस्य केवलं भक्त्यधीनत्वेन पुरुषोत्त
मत्वादुपासनामार्गाद्भक्तिमार्गे वैलक्षण्यं सोपप
त्तिकमनुभूतं भवति तथा कर्त्तेत्यर्थः। ननूपासनादिमा
र्गाणां पुरुषोत्तमापर्यवसायित्वेनानुभवपर्यवसायभ
क्तिमार्गे निरूपणेन तेषु मार्गेषु भक्तिमार्गज्ञानरूपं य ३८
यदज्ञानं स्वीयेषु तन्निवृत्तिमुक्त्वा शरणामार्गस्य पुरुषो

त्तमपयिवसाधित्वेनभक्तिमार्गे त्वं भविष्यतीत्याशंकानिरासा
याग्निमनामाहुः। पृथक्शरणमार्गोपदेष्टेति भक्तिमार्गा
त्पृथाभिन्नः यः शरणमार्गस्तस्योपदेष्टान्यासादेशेधि
त्यादिना स्वीयेषुउपदेशकर्त्ता यद्यपि भक्तिमार्गीयोपि
शरणमार्गोस्तितस्मान्मच्छरणं गच्छेति भगवतैवो
क्तत्वात् भक्तिमार्गीयशरणस्याग्रे स्वरूपानन्दा
नुभवफलपर्यवसायित्वात्तच्छरणस्य भक्तिमार्गीयत्वं
यथा तथा भगवद्रामार्गीयोपिशरणमार्गः भक्तिमार्गीय
शरणमार्गाद्भिन्नोप्यस्ति मर्यादामार्गीय फलसाध
कः। तयोस्तारतम्यशास्त्र त्व माचार्याणामिवेतिज्ञा
पनायापि तन्नामोक्तं पृथक्शरणमार्गोपदेष्टेति। पृथ
क्पदेनभगवन्नीतांसुपायै प्रतिसर्वधर्मान्परित्यज्येत्युप

दिष्टस्य शरणमार्गस्य मर्यादामार्गीयत्वेमेवनतु शुद्धपुष्टि
३६ मार्गीयत्वं उपदिष्टस्य शरणमार्गस्य नष्टो मोहः स्मृ
तिर्लब्धात्वत्प्रसादान्मयाच्युतास्थितोस्मिगतसंदेहः
इति सर्व संदेह निवृत्तिपूर्वकं करिष्ये वचनं तवेति भगव
द्वचीनत्वस्यैव फलत्व निर्देशात्तस्य च मुक्ति पर्यवसा
यित्वेन मर्यादामार्गीयत्वं भक्ति मार्गात पृथक भिन्नः यः
शरणमार्गस्तस्योपदेष्टन्यासोदेशेष्वस्मादिनास्वीयेषु
उपदेशकर्त्ता ननु शरणमार्गस्य पुरुषोत्तमपर्यवसायि
त्वेपिभगवदुपदिष्टत्वेपिन्यासोदेशेष्विंत्पनेन भक्तिमा
र्गभिन्नत्व निरूपणे कोहेतरित्याशंका निरासायाहुः।
श्री कृष्णहार्द्विदिति। श्रीकृष्णस्य फलात्मकस्य हार्दे मेभि ३६
प्रायं वेत्तीति श्रीकृष्णहार्दवित। शरणमार्गस्य भक्तित्वं चेत्स्या

तर्हि भक्तेः साक्षात्स्वरूपसंबन्धफलकत्ववत् शरणागतस्यापि
तत्फलकत्वे नैवोपदेशः स्यान्न तु पापनिवृत्तिफलकत्वेन प्रा
यश्चित्तादिवत् किंच भगवान्हि यथाधिकारं साधनमुपदि
शति। अर्जुनस्य मर्यादापुष्ट्यावंगीकृतत्वादुभयांशसत्वं ज्ञा
त्वोभयसाधनार्थं शरणागमनस्य पापनाशसाधनत्वेन
मर्यादांशत्वं पापफलशोकनिवारणे साधनान्तरमनुक्त्वा
स्वस्यैव साधनत्वेन पुष्ट्यंशत्वमपि ज्ञापयित्वा शरणाग
मोपदेशस्य केवलं स्वाधीनत्वेन स्ववाक्यकरणस्यैव फ
लत्वं ज्ञापयित्वा युद्धकरणे योजितवान् न तु साक्षात्स्व
संबंधं कारितवान्। अत एवार्जुनेनाप्युक्तं करिष्ये वचनं
तवेत्येतावद्भगवदभिप्रायज्ञानमाचार्याणामेव नान्यसं
भवतीति ज्ञापनायोक्तं श्रीकृष्णहार्दविदिति। एवं शरणे

पदेशो भगवदभिप्रायं ज्ञात्वा साक्षात्पुरुषोत्तमस्य पुष्टिमार्गी
४० यफललीलायामेव हृदयं नान्यत्रापीति ज्ञात्वा स्वयं साक्षा
त्पुष्टिलीलारसाभिनिविष्टो जात इति ज्ञापनायाग्रिमं ना
माहुः । प्रतिक्षणानिकुंजस्थलीलारससुपूरित इति । प्र
तिक्षणां निकुंजस्थस्य या लीला तस्याः यो रसः तेन सुष्ठ्वा बा
ह्यांतरभेदेन पूरितः पूर्णः ननु रसपूरणतयाऽप्यन्तर्धर्मि
त्वात्कदाचिदुक्तानां ज्ञानविषयत्वं न भविष्यतीत्या
शंक्य तद्धर्मि ज्ञापकमग्रिमं नामाहुः । तत्कथाक्षिप्त
चित्त इति । तल्लीलारसकथायामेवाऽप्रासमंतात् क्षिप्तं
प्रेरितं चित्तं येन सः । एतेन निरंतर तत्कथाकथनेन भक्ता
नामपि तद्रसपूरितत्वशानसंभवतीति पूर्वकृताशंका परिह ४०
तावेदितव्या । अथवा । प्रतिक्षणानिकुंजस्थलीलारससु

पूरितत्वोत्स्या भगवतो निकुंजे संयोगविप्रयोगोभयरसा
नुभवोऽस्यापितो भवति तेन यदाऽप्राचार्याणां निकुंजस्य संयो
गलीलारसपूरितत्वं तदा वा ह्याभ्यंतरभेदेन तद्रसपूरितत्व
मेव यदा पुनः निकुंजस्य विप्रयोगलीलारसपूरितत्वं यथा
श्रीगीतगोविन्दे तव विरह इत्यादि तदास्यानुभशक्या तत्क
थाक्षिप्तचित्ततया कालनिर्वाहकत्वस्यापनापाद्युक्तं तत्क
थाक्षिप्तचित्त इति । एतेन प्राचार्याणां भयरसपूरितत्वे
न सदा पूर्णस्वरूपानन्दरसपूरितत्वं स्थापितं भवति ।
तत्कथाकथनायैमेवाक्षिप्तं व्याकुलं चित्तं यस्य सः । ननु चिरं
निरंतर
मतद्रसकथाथा एव कथने को हेतुरित्याशंकानिरासायाग्रिम
नामाहुः । तद्विस्मृतान्य इति । तद्रसरूपयैव विस्मृतमन्य
त् तदतिरिक्तं रूपानन्नुगुणां सर्वं येन सः । ननु कथानन्नुगुणा

४२ प्रियत्वेकथानुगुणस्यैव प्रियत्वे किं नियामकमित्याशंकानिरा
सायाहुः। व्रजप्रिय इति व्रजः प्रियो यस्य सः। व्रजप्रियत्वो
क्त्या व्रजस्य कथैनोनुगुणत्वाच्च तत्संबंधिपदार्थमात्रस्य सर्व
स्यैव प्रियत्वमुक्तमिति सुष्ठोक्तं धाननुगुणस्याप्रियत्वमिति।
एवं पूर्वनाम्नि व्रजप्रियत्वमुक्त्वा व्रजस्य प्रियत्वज्ञापनायाग्रि
मनामाहुः। प्रियव्रजस्थितिरिति। प्रिया व्रजस्थितिर्यस्य सः।
यदि व्रजस्य प्रियत्वं न स्यात्तदा तत्र स्थितिं न कुर्यात्। व्रज
स्थितिकथनेनाचार्याणां व्रजप्रियत्वमत्यंतं ज्ञापितं भव
ति। ननु व्रजस्य प्रियत्वेपि तत्र स्थितिकरणे को हेतुरित्या
शंकापरिहारायाहुः। पुष्टिलीलाकर्त्तेति। अत्रायमाशयः।
भगवानपि पुष्टिलीलां रासादिलीलां व्रज एव कृतवानिति ४१
ज्ञात्वा स्वयमपि स्वीयेषु तल्लीलाप्रकारज्ञापनाय तल्ली

त्वानुकरणं कृतवानिति ज्ञापनायोक्तं पुष्टिलीलाकर्त्तेति। यद्य
पि स्वीयानां ज्ञापनायानुकरणेन रसानुभवं कारितवान्
तथापि स्वयमेतल्लीलारसानुभवमेकांत एव करोतीति ज्ञाप
नायोक्तं रहः प्रिय इति। रहः एकांतमेव प्रियं जस्य सः। यद्य
पि स्वयमेकांत एव स्वमनोरथपूर्त्तिप्रकारेण लीलामनुभव
ति तथापि स्वांतरंगभक्तेषु पुष्टिलीलाज्ञानार्त्तिं दृष्ट्वा कथ
नेन तेषामपि तद्विषयिणीमिच्छामार्त्तिं पूरयतीति ज्ञापनायो
क्तं। भक्तेच्छापूरक इति। ननु यथा तथा दार्त्तिदर्शनेन कृ
पया कथनेन तदार्त्तिं शमयति तथा कृपया कदाचित्स्वम
नोरथपूर्त्तिप्रकारकथनमपि भक्तेषु भविष्यतीत्या
शंकानिरासायाहुः। सर्वाज्ञातलीला इति। सर्वैर्भक्तैर
प्यज्ञाता लीला यस्य सः॥ तेन स्वानुभवप्रकाशातिरिक्तप्र

४२ कारमेवबोधयति न तु सा तत्स्वानुभवप्रकारमपीति ज्ञापि
तं । ननु स्वीयेष्वप्यतिप्रचुरभाग्ययोगेन कदाचिदाचार्याः
केन प्रकारेणा भगवद्रसमनुभवंतीति मनोरथ दृष्ट्वा त
न्मनोरथपूरकत्वज्ञापनायाग्रिमनामाहुः । अतिमो
हन इति । अस्यायमाशयः । यद्यपि भक्त मनोरथजा
नाति तथापि तेषु कथनयोग्यां भगवल्लीलां तेन प्रका
रेणाकथयति येन तत्प्रकारश्रवणाजेनितेन रसावि
शेन तथा मुग्धा भवंति येन सर्वमनोरथपूर्त्तिर्भवती
ति ज्ञापनायोक्तमिति मोहन इति । ननु पुष्टिमार्गीयेषु
भक्तेष्वेतल्लीलाज्ञानसंपादकत्वेप्यन्येष्वसम्पादकत्वे ४२
को हेतुरित्याशंकानिरासायाग्रिमनामाहुः । सर्वास
क्त इति । सर्वेषु पुष्टिमार्गीयातिरिक्तेष्वसक्तः कथना

योऽयं पद्बाद्दुपेक्षायुक्तः। अत्र तस्तैर्ब्बा ज्ञापनमिति सुष्ठूक्तं सर्वासक्त
इति। भक्तिमार्गीयेष्वेवैतद्ज्ञापनस्यावश्यकत्वज्ञापनाया
भिमनामाहुः। भक्तमात्रासक्त इति। पुष्टिमार्गीयभक्तेष्वेवास
क्तः कृपायुक्तः। अत्र मात्रपदोपादानेन यथा भक्तमात्र एवास
क्तिस्तथा तदितरमात्रेष्वनासक्तिरपीति ज्ञापितं। यद्यपि
पूर्वनाम्नि भक्तमात्रासक्तत्वं निरूपितं तथापि प्रकारांत
रेणापि विशेषतो भक्तमात्रासक्तं निरूपणायाऽग्रिमं नामा
हुः। पतितपावन इति। अत्र पतितपावनत्वकथनस्यायमा
शयः। लोकप्रसिद्धपातकानां भक्तिमार्गीयेषु सर्वात्मना
ऽसंभवितत्वेपि यत्पतितपावनत्वकथनं तदेतन्मार्गीय
पतितपावनपरमिति ज्ञेयं। नन्वेतन्मार्गे किं पातकमिति चे
त् उच्यते। यथा मर्यादामार्गे वर्णाश्रमविरुद्धनिषिद्धाचरणे

न पतितत्वं तथैतन्मार्गे साक्षाद्भक्तिमार्गविरुद्धधर्माचरणे
४३ नैव पतितत्वं भक्तिमार्गीयेषु भक्तिमार्गविरुद्धधर्माचरणा
निराकरणपूर्वकं साक्षाद्भक्तिमार्गीयधर्मप्रवर्त्तनेन पा
वनसामर्थ्यमाचार्याणामेव नान्यस्यापीति ज्ञापनाय यो
क्तं पतितपावन इति मार्गीतरीयपातकानां तत्तत्प्रक
रणोक्तप्रायश्चित्तैरेव निवृत्तिकथनाच्चाचार्याणामुपयो
गः। अतएवं भक्तिमार्गे भक्तिमार्गविरुद्धधर्मकरणस्यैव
पातकत्वज्ञापनायैव संन्यासनिर्णयेप्याचार्यैरुक्तमन्य
था पतितो भवेदिति स्वमार्गाच्च्युतो भवेदित्यर्थः। नन्वेत
न्मार्गीयपतितपावनसामर्थ्यं यदाचार्याणामुक्तं तद्व्याप
कासाधारणधर्मज्ञापकमग्रिमं नामाहुः। स्वयशोगान ४३
संहृष्टहृदयाम्भोजविष्टर इति। स्वयशोगानेन संहृष्टाः भ

स्तेषां हृदयानि भक्तिमार्गीयत्वेनांभोजरूपाणि तान्येव विष्ट
ररूपाणि आसनरूपाणि यस्य सः। अत्रायमाशयः। यदि सर्वा
त्मना स्वमार्गीयपातकनिवृत्तिर्न स्यात्तदायश्चासः निर्दुष्टत्वा
द्यत्किंचिद्दोषसंभावनायामपिरते ध्रुवतो न हृदये हर्षो न स्यात्क
दाचिद्वस्तुस्वभावाद्धर्षसंभवेपि हृदयस्य भक्तिमार्गीयत्वं
न स्याद्भक्तिमार्गीयत्वाभावे तद्धृदयेऽऽचार्याणां स्थितिर्न स्या
त्। तस्मान्निवृत्तिदोषेषु स्वीयेषु हर्षादित्रितयधर्मदर्शनेना
त्स्पष्टमेव पतितपावनत्वमिति। ननु कथं ज्ञायते तद्धृदये
सर्वदाऽऽचार्याणां स्थितिरित्याशंकानिरासाय सदा स्थिति
ज्ञापकमग्रिमनामाहुः। यशः पीयूषलहरीप्लावितान्यरस
इति। यदि तेषां हृदये सर्वदाऽऽचार्यस्थितिर्न स्यात्तर्ह्या
चार्याणां स्वयशोऽमृतलहरीभिस्तेषां हृदये प्लावितान्य

रसत्वं न स्यात्। यशसः पीयूषनिरूपणेन यथा स्वर्गे देवा
४४ नां पीयूषमेव जीवनहेतुः तथा एतन्मार्गीयाणां एतद्य
शः पीयूषमेव जीवनहेतुरित्युक्तं भवति। ननु आचार्य
यशसः कथं तदितरसर्वरसप्लावकत्वं इत्याशंकां निरासाया
भिमन्नामाहुः। पर इति। परः अक्षरात् परः अगणितानंदपु
रुषोत्तम इत्यर्थः तेन आचार्ययशसः तदितररसविस्मारकत्वे
उपपत्तिरुक्ता भवति। एवं आचार्ययशसा तदीयानां सर्वरस
विस्मारकत्वमुपपाद्य भगवल्लीलारसेनापि बाह्याभ्यंतरभे
देन पूरकत्वस्थापनाया ग्रिमनामाहुः। लीलामृतरसार्द्री
कृतः अखिलशरीरभृदिति। लीलारूपो योयं अमृतर
सः तेनार्द्रीकृताः अखिलास्सर्वे या देहभृतो येन सः। ४४
आर्द्रपदस्य व्याहृत्या बाह्याभ्यंतरभेदेन सरसत्वं स्थापि

तं भवति । एतेन बाह्याभ्यंतरभेदेनाद्वयंतमार्द्रं वस्त्रं पयास्व
जातीयं शुष्कमपि स्वसंबंधमप्यार्द्रं करोतीति तथाऽऽचार्यै
र्लीलामृतार्द्रीकृता भक्ताः स्वसंबंधात्तु स्वसजातीयमपि
ऽप्यार्द्रं कुर्वंतीति ज्ञापनायाप्युक्तं लीलामृतरसार्द्रीकृता
खिलशरीरमृदिति । एवं कृपया लीलामृतरसेन भक्तान्पू
रयित्वा स्वस्थिरपस्थानज्ञापनायाग्रिमनामाहुः । गोवर्द्धनस्थि
त्युत्साहइति । गोवर्द्धनस्थितावेवोत्साहोऽध्यवसाय
निश्चयो यस्य सः । एवं स्वस्थितिज्ञापनेन स्वीयानां स्व
स्थानस्वरूपं ज्ञापितं भवति । ननु गोवर्द्धनावेवोत्साहे
को हेतुरित्याशंकानिरासायाग्रिमनामाहुः । तल्ली
ला प्रेमपूरितइति । तस्य गोवर्द्धनस्य उद्धरणोत्तं तस्मा
त्मधुरणमिति विचार्य सर्वतः पृथक्कृत्य केवलं स्वीयत्व

संपादनपूर्वकक्षुत्तृडादिवाधानिवर्त्तकस्वरूपानन्ददानपूर्व
४५ कारक्षारूपायालीलातज्जनितंयत्प्रमतेनपूरितः। ननुयथा
ऽऽचार्याणांप्रमुक्तरसलीलापूरणत्वेसत्यप्यधुनाश्रीगो
वर्द्धनोद्धरणलीलाप्रेमपूरकत्वकथनेकोहेतुरित्याशंकानि
रासायाऽऽहिनमेनामाहुः। यज्ञभोक्तेति। ऽस्यायमाशयः। यद्य
पियागदत्तवलिभोजनानन्तरंश्रीगोवर्द्धनोद्धरणंकृतंत
थापिगोवर्द्धनोद्धरणेवलिभोजनस्यैवहेतुत्वंभोजनेच
सुखस्यैवहेतुत्वंऽऽचार्याणांचतन्मुखरूपत्वेनतद्भो
क्तृत्वंऽऽचार्याणामेवेतिज्ञापनायोक्तंयज्ञभोक्तेति। ननुय
द्यपिऽऽचार्याणांयज्ञभोक्तृत्वंऽऽचार्याणामेवेतिमस्ति
तथापियागकरणव्यतिरेकेणभोक्तृत्वंनसम्भवतीतिया ४५
गकरणस्यैवपूर्वंनिरूपणमुचितंतथापीन्द्रस्यवृष्टि

^ इत्यादिषु यद्यपि शेलौ स्मीत्यत्र वदद्भूरिबलमाह्नहद्धपुरितिवचनाद्भगवत
स्य भोक्तृत्वं तथापि पं. ३

करणे साक्षाद्वृत्तिभोजनस्यैव हेतुत्वं वृत्तिभोजनेयागकरणा
स्य हेतुत्वमिति उभयोः साक्षात्परंपरा हेतुत्वज्ञापनाय व्य
त्यासेन निरूपणमिति ज्ञापनाय यज्ञकर्त्रीत्युक्तं । ननु यद्यप्य,
स्य यागस्य गोसवत्वेन वेदाप्रसिद्धत्वेन केवलं भगवदुप
दिष्टत्वेन भगवदेव कर्तृत्वमयातीति कल्पनाचार्याणां यज्ञ
कर्तृत्वमिति चेत् । सत्यं । यद्यपि उपदेशद्वारा कर्तृत्वं भगवत
एव तथापि उद्देश्यस्य वाच्यरूपत्वेन तदधिष्ठातृत्वं प्राचार्याणा
मेवेति कर्तृत्वं तत्रैव पर्यवस्यतीति ज्ञापनायोक्तं यज्ञकर्त्रीति ।
एवं यज्ञकर्तृत्वमुक्त्वा यज्ञेनैव व्रजवासिनां एषो वजानतो
मस्त्वीति विकल्पनेन सर्वपुरुषार्थसाधकत्वज्ञापनायाग्रि
मं नामाहुः । चतुर्वर्गविशारदा । यद्यपि लोके चतुर्वर्गपदेन
धर्मार्थकाममोक्षा उच्यंते । तथापि व्रजवासिनां साक्षाद्भग

वत्स्वरूपानुभवात्लौकसिद्धानांधर्मादीनामप्यनुपयोगा
८६ त्स्वस्य गवांच त्लौकोपयोगित्वेन तत्सुखेनैव सर्वपुरु
षार्थसाधनैकस्वत्वमिति ज्ञापनायोक्तंच तुर्वर्गविशार
द इति। यद्यपि एषो व्रजानंत इति व्रजवासिनः प्रतिभग
वद्वाक्यं तथापि वागधिष्ठातृरूपत्वमाचार्याणामेवेतित
द्वाक्यमाचार्येष्वेव पर्यवस्यतीति ज्ञापनायाचार्यनामो
क्तं चतुर्वर्गविशारद इति। एवं पूर्वोक्तप्रकारेण व्रजवासि
नां चतुर्वर्गसाधकत्वमुपपाद्य स्वीयेष्वपि स्वमार्गीयच
तुर्वर्गसाधकत्वज्ञापकमग्रिमं नामाहुः। सत्यप्रतिज्ञ इति।
सत्या यथार्था प्रतिज्ञा यस्य सः। अस्यायमर्थः। यदाऽऽचार्यैः
भगवदाज्ञया स्वमार्गप्राकट्यं कृतं तदा इयं प्रतिज्ञापि कृता। ८६
येऽस्मिन्मार्गे प्रपन्ना भविष्यंति तान्सर्वानेव स्वमार्गीयपु

रूपाधिदानेन उद्धरिष्ये इति स्वमार्गीयत्पुरुषाधोः शुद्धपुष्टिमार्गीय
पुरुषाणां पुष्टिमार्गे हरेर्दास्यं धर्मो यो हरिरेव हि कामो हरेर्दिदृ
क्षैव मोक्षः कृष्णस्य चेद् ध्रुवं इत्युक्त्वा ज्ञापनायोक्तं सत्यप्रतिज्ञ इति।
ननु सर्वात्मना सर्वांशेन प्रतिज्ञायाः सत्यत्व इयदवधिं न कुत्रापि दृष्ट
मिति कथमाचार्ये प्रतिज्ञायाः सत्यत्वमित्याशंका निरासायाभिनमना
माहुः। त्रिगुणातीत इति। त्रिगुणाः प्राकृताः सत्वरजस्तमरूपाः तानु
अतीतः अतिक्रांतः अनेन सत्यप्रतिज्ञात्वे हेतुरुक्तः अत्रायमाशयः अ
न्येषां प्राकृतिगुणासंभवात् प्राकृतत्वेन दोषसंबंधात् तत्कृत प्रति
ज्ञायाः अपि दुष्टत्वात् निर्दुष्टस्यैव सत्यत्वात् प्रतिज्ञायाः अपि असत्य
त्वं आचार्याणां प्रकृतिगुणराहित्येन निर्दुष्टत्वात्तत्प्रतिज्ञाया अ
पि निर्दुष्टत्वेन सत्यत्वमेवेति ज्ञापनायोक्तं त्रिगुणातीत इति। एव

सत्यप्रतिज्ञत्वहेतुमुपपाद्य यदुद्धाराय प्रतिज्ञाकरणं तेषां स्वमार्गीयमर्यादा
४६ ज्ञापनायाग्निमंनामाहुः। नयविशारद इति विशारद इति। नयेस्वसिद्धांतशास्त्रे
विशारदः प्रत्यंतंनिपुणः। एवं स्वीयानां स्वमार्गीयमर्यादाज्ञापकशास्त्रकर
णं निरूप्य तत्करणहेतुभूतमग्निमंनामाहुः। स्वकीर्त्तिवर्द्धन इति। स्वमार्गीय
रहस्यग्रंथनिरूपणेन स्वीयेषु स्वकीर्त्तिवर्द्धनः एवं स्वकीयेषु स्वकीर्त्तिवर्द्धक
त्वमुपपाद्य मायावदादिशास्त्रप्रवर्त्तक पंडितेष्वपि स्वकीर्त्तिवर्द्धकत्वज्ञापना
यान्निमंनामाहुः। तत्वसूत्रभाष्यप्रदर्शक इति। तत्वसूत्राणि ब्रह्मतत्वनि
रूपकाणि व्याससूत्राणि तेषां भाष्यं तदर्थप्रतिपादकं शास्त्रं तस्य प्रदर्शकः
प्रकाशक इत्यर्थः। यद्यपि शंकराचार्यादीनामपि व्याससूत्रभाष्यकर्तृ
त्वं वर्त्तते। तथापि तत्र लक्षणमाश्रित्य सूत्रार्थव्याख्यानात् तस्य सत्यज्ञान ४६
मनंतं ब्रह्म रसो वै सः इत्याद्युपनिषद्वाक्यविरोधात् न साक्षात् तत्र सूत्रप्रति

पादकत्वं।आचार्याणां तु साक्षात्सूत्रार्थस्य सत्यं ज्ञानमनंतं ब्रह्म रसो वै स इत्याद्युप
निषद्वाक्यविरोधेन ब्रह्मधर्मप्रतिपादनपूर्वकं निरूपकत्वज्ञापनायोक्तं तत्वसू
त्रभाष्यप्रदर्शकं इति।एतेन मायावादिशास्त्रप्रवर्त्तकपंडितेष्वपि प्रसाधारणकी
र्त्तिवर्द्धकत्वमुक्तं।ननु अधुनालोके मायावादस्यैव प्रचुरत्वेन शास्त्रांतरमतदूष
कत्वप्रतिभाति यथा तथा आचार्यप्रतिपादितव्याससूत्रभाष्यस्यापि दूषकत्वे
न भविष्यतीत्याशंकानिरासायाग्रिमं नामाहुः।मायावादाख्यतूलाग्निरिति।
मायावादीति आख्यानाम यस्य तदेतत् तूलमिव तूलमिव तूलं तस्य अग्निः दाह
क इत्यर्थः।अत्र मायावादस्य तूलत्वनिरूपणेन आचार्याणामग्नित्वनिरूप
णेन यथा महानपि तूलराशिः अल्पाग्निसंबंधेनापि दग्धो भवति तथा आचा
र्यनिरूपितैकतत्वसूत्रार्थनिरूपणेन सर्वोपि मायावादो निराकृतो भवतीति ज्ञा
पनायाप्युक्तं मायावादाख्यतूलाग्निरिति ननु पूर्वं मायावादनिराकर्त्रेति

निरू° [illegible]ष्वैपि पुनर्जन्मायावादाख्यतूलाग्निरित्युक्तं तस्यायमाशयः। पूर्वं तु सामान्यतोनि
४७ राकरणमुक्तमधुना प्रतिसूत्रं निराकरणात्वज्ञापनायोक्तमिति न पौनरुक्तिमिति स
विमनवद्यं ननु मायावादनिराकरणांकं वादमाश्रित्य कृतमित्याशंकानिरासाया
भिमतं नामाहुः। ब्रह्मवादनिरूपक इति। सर्वं खल्विदं ब्रह्म यदिदं किंचित्तत्सत्याच
ष्टत इत्याद्युपनिषद्वाक्यप्रतिपादितो यो ब्रह्मवादः तन्निरूपकः तत्प्रतिपादक इत्य
र्थः। एवं ब्रह्मवादनिरूपकत्वमुपपाद्याग्निमनामभिः अप्राकृताखिलाकल्पभूषि
तत्वकथनस्यायमाशयः। व्यासश्चतुर्थाध्यायस्य फलाध्यायत्वात्स्वमा
र्गफलत्वेन भगद्भावत्वेन अप्राकृतः अलौकिकाः अखिलाः सर्वे ये लीलारसभा
वाः अतएव अप्राकल्पस्वरूपत्वेन शोभारूपाः तैः भूषितः तच्छोभायुक्तः यद्यपि अ
न्यैरपि भाष्यकृद्भिः फलाध्याये स्वस्वमार्गीयफलं निरूपितमस्ति तथापि सर्वोत्कृ ४७
ष्टलीलारसफलनिरूपकत्वं तत्कृतशोभा आचार्याणामेव नान्येषामपीति

ज्ञापनायोक्तं। प्राकृताखिलाकल्पभूषितइति। एवंलीलारसभावजनितशोभायुक्त
त्वंनिरूप्यतद्युक्तत्वंज्ञापकंप्रागिनमंनामाहुः। सहजस्मितइति। निरूपितलीला
रसस्मरणारसस्वभावजनितंस्मितंयस्यसः। एतेनप्राचार्याणांअलौकिकाकल्प
शोभांसकार्यानिरूप्यअतःपरंप्राचार्याणांशोभाकृतिहेतुत्वज्ञापनायाग्निमंना
माहुः। त्रिलोकीभूषणमितिग्रचायमाशयः। त्रयाणांलोकानांसमाहारस्त्रि
लोकीतिविहत्पत्त्याप्राचार्याणांतत्रभूषणत्वमसंभावितमितित्रिलोक्याः
तमोरजःसत्वात्मकेनतद्गुणविशिष्टाःस्वकीयाएवत्रिलोकीपदेनोच्यंते
तेषांशोभाप्राचार्यसंबंधकृतेवनान्ययेतिज्ञापनायोक्तंत्रिलोकीभूषणमि
ति। एवंस्वीयानांशोभाहेतुत्वंनिरूप्याचार्यचरणसंबंधात्भूमेरपिउक
र्षसाध्यकमग्रिमंनामाहुः। भूमिभाग्यमिति। भूमेःभाग्यंपूर्णपुण्यफलमि
त्यर्थः। अत्रायंभावः। भूमेर्भक्तत्वात्प्राचार्यैःशुद्धभक्तिमार्गस्यैव प्रकटित

४८ त्वात्तज्जनितसन्तोषेणाऽऽचार्यैश्चिन्तितं भूमिः स्वभाग्यत्वेनैव मनुत इति ज्ञाप
नायोक्तं भूमिभाग्यमिति भूमेः शुद्धपुष्टिमार्गीयभक्तत्वं श्रीभागवत एव भूमेः
सुरेतरवरूथविमर्दितायाः इत्यत्र भूमिमर्दनक्लेशनिवृत्तिकेत्मेत्वेन भगव
त्प्राकट्येनैव निरूपितं एतत्स्वफलप्रकरणेपि व्रजभुवशमयन्स्फुरतो
द्भिरित्युक्तं एवमाचार्याणां भक्तिमार्गप्रकटकत्वेन हेतुना भूमिभाग्य
त्वं निरूप्य स्वीयानां निर्हेतुकदर्शनमात्रस्यैव स्वभाग्यहेतुत्वज्ञा
कधर्मविशिष्टमग्रिमं नामाहुः। सहजसुन्दरः इति। यद्यपि स्वीयानां
साक्षात्स्वरूपदर्शनमेव स्वभाग्यस्फूर्तौ हेतुस्तथापि सौंदर्यस्याऽनागंतुक
त्वेन स्वाभाविकत्वज्ञापनायोक्तं सहजसुन्दर इति। एवं भक्तानां भाग्य
रूपत्वेन आचार्याणां स्वरूपं निरूप्य तेषामेव तच्चरणारविन्दरजस एव ४८
सैहिकामुष्मिकसर्वपुरुषार्थसाधकत्वज्ञापनायाग्रिमं नामाहुः। अशेष

भक्तसंप्रार्थ्यचरणाब्जरजोधनः इति। अशेषः भक्तैः सम्यक्रोहिकामुष्मि
कसर्वपुरुषार्थसाधकधनत्वेन प्रार्थ्यं चरणाब्जरजोधनं यस्य सः। अनेन
भक्तानां चरणारविन्दरजोविहायान्यपदार्थस्य प्रार्थनीयत्वाभावोज्ञा
पितः। एवमाचार्याणामष्टोत्तरशतनामानि निरूप्य उपसंहरति। इत्या
नन्दनिधेरिति। इतीति। अनेन प्रकारेण आनन्दनिधेः आनन्दसमु
द्रस्य आचार्यस्य आचार्याणामानंदसमुद्रत्वोक्त्या सदा अगाधत्वपू
र्णत्वानवरतोच्छलत्तरंगवत्त्वविविधलीलारसभावरत्नाकरत्वा
दिधर्मवत्त्वं ज्ञापितं भवति। नाम्नामष्टोत्तरशतं मया श्रीविठ्ठलेशेन प्रोक्तं
प्रकर्षेण कथितं। अत्र कथने प्रशब्दोपादानेन सिद्धान्तप्रवचनाम्नां प्रकाशक
त्वं न तु कल्पयित्वा कथनमिति ज्ञापितं। एवं नाम प्रकाशकत्वमुपपाद्य
तत्प्रकाशनप्रयोजनमुत्तरार्द्धेनाहुः। श्रद्धेति। श्रद्धया विशेषेण शुद्धाद्दुः

४९ संगाद्यनपनोयाबुद्धिर्यस्यसः। श्रद्धाविशुद्धबुद्धिः, तादृशः सन् यः जनः पठ
ति। अन्वयः पठति सामान्यो तपास्वमार्गीयत्वमेवहेतुः। ननुवशो विशाव
स्यापि पठनेनिमित्तत्वमिति ज्ञापितं। एवं पठने स्वीयमात्राधिकारत्वमुप
पाद्यपाठस्यावश्यकत्वज्ञापनाय कालनियममाहुः अनुदिनमिति। प्र
तिदिनमित्यर्थः यः पठति सः पूर्वं तदेकमनाः भवति ते श्रीवल्लभाचार्येष्वेव
एकं केवलं मनो यस्य तादृशो भवति। तदनंतरं उत्कांकृष्णाधरामृतस्वादरू
पां सिद्धिं फलं प्राप्नोति स्वस्वमनोभिलषितप्रकारेण फलानुभवज्ञापनायप्र
शब्द। एवं फलप्राप्तिमुक्त्वा फलप्राप्तेरव्यभिचारित्वज्ञापनायाहुः।
असंशयमिति। निःसंदिग्धमित्यर्थः। एवमव्यभिचारेण स्वकीयेषु। स्व
मार्गीयफलप्राप्तिं निरूप्य अस्य फलस्य इतरमार्गीयमुक्तिफलापेक्ष ४९
याप्राधिक्यज्ञापनायाहुः। तदप्राप्तौ वृथा मोक्ष इति। तस्य स्वमार्गीयफ

स्तस्य प्राप्तौ मोक्षोऽपि सायुज्यादिरपि वृथा एतन्मार्गीयफलाभावात्। निर
पेक्ष इत्यर्थः। तस्य स्वमार्गीयफलस्य प्राप्तौ प्राप्तौ सत्यां तस्य सायुज्यादेः
गता[illegible]ता निरपेक्षे इत्यर्थः। एवं स्वमार्गीयफलस्य सर्वोत्कृष्टत्वं नि
रूप्य एतत्स्तोत्रपाठस्य एतत्फलसाधकत्वज्ञापनाय आवश्यक
त्वनिरूपणायाहुः। अत इति। यतः अस्य स्तोत्रपाठस्य एतत्फलसा
धकत्वं ज्ञापनाय आवश्यकत्वनिरूपणाय अत एव एतत्स्तोत्रस्य
सर्वोत्तमत्वमिति ज्ञापनाय स्तोत्रनाम निरूपणपूर्वकं पाठस्यावश्य
कत्वमुक्तं। पूर्वं स्तोत्रपाठकथनेन अधुना जप्यत्वकथनस्यायमा
शयः। यावत्सर्वं स्तोत्रं निःसंदिग्धं नायाति तावत्पाठ एव कर्त्तव्यः
सम्यगागमनानंतरं गुप्ततया जप एव कर्त्तव्यः न तु प्रकटतया पठनी
यमिति ज्ञापनायोक्तं जप्यमिति। एवं स्तोत्रस्य जप्यत्वं प्रतिपा

५० ध्यजपाधिकारिणः प्राहुः। कृष्णारसाधिपैभिरिति। एवं स्तोत्रजपाधिका
रिणो निरूप्य स्तोत्रसमाप्तिं निरूपयन्ति। इति श्रीमदिति। एव
माचार्यनामानि विवृतान्यस्य व्याकृतिः समंतवाचार्यचर
णानाम हृत्यो यमिति स्वतः।२। श्रीआचार्य नामशताष्टकमौ
क्तिकानि श्रीविठ्ठलेनोक्तानि रससागरनिर्गतानि। श्रीवल्लभो
क्तविवृते गुणगुंफितानि कुर्वंतु कंठभूषिं भक्तजना जपा
र्थं ॥ इति श्रीमत्प्रभुचरणोक्तान श्रीवल्लभविरचिता
सर्वोत्तमस्तोत्रविवृतिः संपूर्णा ॥ ॥ ॥ शुभं भवतु
॥ ॥ ॥ श्रीकल्याणमस्तु ॥ श्रीरस्तु ॥ ॥ ॥